चैतन्यनन्दनम्

निष्ठल सुब्रह्मण्यः

चैतन्यनन्दनम्

रचयिता

निष्ठल सुब्रह्मण्यः

CHYTANYANANDANAM

By

NISTALA SUBRAHMANYAM

Copy Rights Reserved
By the Author

For Copies : N. PHANIKUMAR
S/o Nistala Subrahmanyam
S. B. S. Sanskrit College
PONNUR-522 124
Guntur Dt. (A. P.)

Q2:4196

MAY, 1987
PRICE : Rs. 25/-

Printed at
HINDI PRESS
TADIKONDA

प्रास्ताविकम्

अयि भोस्सुरवाणीकाव्यास्वादन कुशलाः सहृदयाः!

इदं च चैतन्यनन्दनाभिधं भक्तिप्रधानं काव्यं समर्प्यते मया। अस्मिन् स्वर्णधारास्तुतिः विद्यते। जगद्गुरु श्रीशङ्करभगवत्पादानां कनकधारास्तुति प्रेरितोऽहं अस्मद्वंश देवतां वल्लीं आश्रित्य स्तुति मेतां प्राणैषम्। ततस्ता'रुण्य तटिनी ग्रन्थं सौन्दर्यलहरी प्रेरितः अकार्षम्। तारुण्यं यौवनं तटिनीरूपेण प्रवहतीति। तारुण्यतटिनी सौन्दर्यलहरीवत्। अस्यां स्तुतौ भगवत्याः पराम्बिकयाः तारुण्यं प्रशंसितम्। देवी त्रिंशद्वर्षवयस्का प्रस्तुता। 'त्रिंशता तरुणीमता' इत्युक्तेः। अथ 'तरुणी तापसाराध्या' इति ललिता सहस्र नामसु श्रवणात् तरुणी ललिताम्बा। तस्याः भावः तारुण्यं ललितात्वम्। चित्त्वमिति फलितम्। तच्चैतन्यं नदीरूपेण प्रवहतीति हार्दिकोऽभिप्रायः। दीनवन्धवष्टकं विलोक्य, तारुण्यतटिन्याः एव अनाथनाथास्तुतिरिति अन्यत् नाम कृतवानहम्। संस्कृतसाहित्ये वासुदेवरसायनमिति ग्रन्थोऽस्ति। तन्नामाकृष्टेन मया हरिरसायन ग्रन्थः प्रणीतः। शिवस्तोत्र पठनस्पन्दितचेतसा मया श्रीकण्ठशतकं कृतम्। आन्ध्रया मन्नमय्यसोमनादयः गैर्वाण्यां नीलकण्ठ दीक्षिताः अपि लघ्वीभिर्नुतिभिर्नुताः।

चैतन्यं ब्रह्म। अत्र सगुणं ब्रह्म नन्दयतीति चैतन्यनन्दनम्। चैतन्यं चिच्छक्तिः। एषा चिदेव नन्दनवनमिव वर्णितम्। अस्मिंश्च नन्दनवने स्वर्ण-धारास्तुतिः सन्तानकवृक्षः। हरिरसायनं हरिचन्दनपादपः। श्रीकण्ठशतकं मन्दारवृक्षः। तारुण्य तटिनी कल्पलता। शक्तिनुतिः पारिजातकुटः। चिन्नन्दनं प्रविष्टेभ्य एते देवतातरवः अभिलषितानि दास्यन्तीति। पारेपथं लघुस्तुतिमन्दानिलाः वान्ति। एते संसार तापं अपनुदन्तः अमन्दानन्दं

वितरन्ति । एष ग्रन्थः देवतोपासकैः गुरुभिः आशीर्भिस्सत्कृतः । एवं रचयितुर्मम नन्दनरूपोऽयं ग्रन्थः बालारिष्टानतिक्रम्य जडत्वं विहाय अमोघाशीश्चैतन्यमाप्य मां नन्दयति । युष्मच्चेतस्सु देव्यनुग्रहेण चैतन्यं विदधन्नन्दयतु युष्मानपि । चैतन्यमेव हृदयात्बहिः आगत्य नन्दनरूपमापन्नम् । चैतन्येन नन्दनं क स्सचेताः नाभिलषतीति ?

काव्ये च प्रौढतासिद्ध्यै तत्र तत्र दूरान्वयः उररीकृतः । ममेदं चापलं क्षम्यतां गुणग्राहिभिर्भवद्भिः । भगवती ललिताम्बिका मदीयां कवितां उरीकुर्वती निश्श्रेयसं ददातु मह्यम् । चैतन्यं मां नन्दय त्वनुग्रहेण । पाठकेभ्यो वितरतु तत्तदभिलषितानि । अभिप्रायं दत्तवद्भ्यः विद्वद्वरेभ्यः नमांसि भूयांसि । साधुता पर्यवेक्षणं कृतवद्भ्यः अस्मत्प्रियमित्रेभ्यः डा॥ श्री सूरं श्रीनिवासुलु महोदयेभ्यः हार्दिकान्यभिनन्दनानि । सभाध्यक्षेभ्यः ऋषितुल्येभ्यः श्री राघवनारायण शास्त्रिभ्यः, ग्रन्थमाविष्कुर्वद्भ्यः अस्मद्गुरुभ्यः श्री सुब्रह्मण्यशास्त्रिभ्यश्च नमोवाकाः । ग्रन्थमुद्रणाय धनसाहाय्यं कृतवद्भ्यः श्री तिरुपति देवस्थान सभ्येभ्यः साधुवादाः । पि० वि० आर्० अप्पाराव् नाम्ने मित्राय च अभिनन्दनम् ।

श्लो॥ गुणो गुण इतिप्रोच्यः
दोषो दोष इतीर्यताम् ।
शारदोपासकै नूंनम्
पण्डितैर्गुणरागिभिः ॥

श्लो॥ सुब्रह्मण्येन गण्या च
भण्या मण्युज्ज्वलानुतिः।
कृतापुण्याय भक्तानां
गुण्या सन्ध्रियतां बुधैः ॥

श्लो॥ गुणग्रहणपारीणैः
रसभावनिमज्जितैः ।
उपेक्ष्यतां क्वचिद्दोषः
सिकताणुर्वं पानके ॥

भगवतीं प्रति ममेदं वचः —

వ॥ వివ్యం దీఱని భక్తిలేక కవితావేశంబునన్ సత్కవుల్
నవ్వన్ నేసృజియించినాఁడ కవితానారీమణిన్ బ్రహ్మమా
రవ్యంతైన గుణంబుఁజూచి కవితారాధ్యా సుధీచంద్రమా
నావ్యంజేయక మోక్షచంద్రికల నన్నోంకార రక్షింపవే.

श्लो॥ काव्येऽस्मिन् स्वल्पभक्तेर्मे
विद्वद्धास्यैकभाजने ।
गुणं कञ्चित्प्रकल्प्याम्ब
गृहाण पितृमूर्तिके ॥

किञ्च,

श्लो॥ श्रीहर्षमाघकविता
छायालेशमभीप्सतः ।
सुब्रह्मण्यस्य काव्येऽस्मिन्
सानुक्रोशाऽस्त्व भारति ॥

भवदीय सहृदयविधेयः
निष्ठल सुब्रह्मण्यः

This book is published with
the financial assistance of
Tirumala Tirupati Devasthanams
under the scheme
aid to publish Religious Books.

निवापः

कृतिभर्ता

जननम् : १९२०

मरणम् : १९७७

नमांसि सन्तु भूयांसि पित्रे सन्यासि शर्मणे ।
देवीपदाम्बुजद्वन्द्वमिळिन्दाय महात्मने ॥ १

अजंशान्तं परम्ब्रह्म पितूरूपमुपाश्रितम् ।
ध्यायं ध्यायमदीनोऽहं लभेयं परनिर्वृतिम् ॥ २

भक्त्यम्बुधारा स्तुतिभिः लघ्वीभिश्च तिलैर्युता ।
बृहत्स्तोत्रकुशैस्साकं पितृभ्यो दीयतेऽधुना ॥ (कर्तुःश्लोकाः) ३

किञ्च,

देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च ।
नमस्स्वधायै स्वहायै नित्यमेव नमोनमः ॥

ईशानः पितृरूपेण महादेवो महेश्वरः ।
प्रीयतां भगवानीशः परमात्मा सदाशिवः ॥

अपिच,

पितृपितामहप्रपितामहेभ्यः हरितगोत्रेभ्यः सुब्रह्मण्यसन्यासीश्वरसिंहाद्यप्पलेश्वरसीतारामेश्वरशर्मभ्यः वसुरुद्रादित्यरूपेभ्यः इदमिदं काव्यममृतस्वरूपं स्वधानमः ।

॥ अविघ्नमस्त्विति भवन्तो ब्रुवन्तु ॥

श्रीकनकदुर्गास्तुतिः

श्री निष्ठल सुब्रह्मण्य सन्यासि शर्मा

श्रीमतीं कनकाह्वयां परदेवतां
भावये कमलाम्बिकां जगदीश्वरीम् ।
दुर्गं माप दुमां शुभां जननीं शिवाम्
सूर्यचन्द्रमयीं निजश्चितिरूपिणीम् ॥

यदस्ति सम्यङ्मकरादिरूपं
चकास्ति तत्कुण्डलयुग्म मीड्य ।
सूर्यश्च शीतांशु रितीयते तत्
विभावये श्रीपरदेवतायाः ॥

विशाखपूर्वस्थितां
परेश्वरीं पुरेश्वरीम् ।
निरीश्वरीं सदीश्वरीं
सुहेमभां महर्ह्रियम् ॥

आनन्दकन्दाङ्कुरभासमानां
वन्दारु सन्देह तमोऽपहन्त्रीम् ।
इन्द्रादिसम्पूजितपादपद्मां
पद्माटवीसञ्चरणेऽनुषक्ताम् ॥

श्रं मातुरेवं परिचिन्तयामि
पादाब्जयुग्मं परदेवतायाः ।
ब्रह्मेन्द्ररुद्रादिभि रीड्यमानं
सनन्दनानन्दकरं विभास्वत् ॥

इन्द्राननां चन्दनचर्चिताङ्गीं
वन्द्यां सुसन्ध्यां जगदान्ध्य हर्त्रीम् ।
सान्द्रारविन्दामृतविन्दुरम्यां
श्रियं ह्रियं ता मभयप्रदात्रीम् ॥

रत्नानि दिव्यानि नवापि यत्र
सम्यक्शुभानि ग्रथितानि सन्ति ।
तुल्यं निधीनां नवकं च यत्ते
मञ्जीरयुग्मं हृदि चिन्तयामि ॥

अहस्स्वरूपा महरादिनम्यां
अहं धिया भावयितुं सदाऽर्हाम् ।
अहो अहोरात्रपरां प्रशान्तां
महं हृदा त्वां कलयामि मातः ॥

नादात्मिकां बिन्दुमयीं सदीशीं
वेदादिबीजात्मतया विभान्तीम् ।
सादाख्यया शुद्धचिदीशकान्त्या
मोदाय विद्वत्प्रवरै र्विचिन्त्याम् ॥

श्रीचक्रमध्यस्थ चिदाकृति स्त्वं
ब्रह्माण्डमूलं परिगीयमाना ।
श्रीविद्यया शोधितकुण्डलिन्या
ब ह्ये तदन्तः प्रविभ.सि मातः ॥

वन्देऽरुणां त्वां कमनीयरूपां
वन्दारुहृन्द्यन्वह मावसन्तीम् ।
इन्द्रादिभि स्संस्तुतदिव्यधाम्नीं
सान्द्रारविन्दप्रभयातिपीताम् ॥

या त्वं चिति स्सर्वजगत्प्रसूवी
तत्त्वात्मिका सर्वधियां विनेत्री ।
मातुर्भृतौ सन्तत जागरूकां
तां त्वां चिदीशीं हृदि भावयामि ॥

यया सुरा स्सर्वजगज्जनन्या
दुर्गापदाब्जे स्सुखमुद्धृतास्ते ।
अहं कृतायक्षमहो न्वपश्यन्
सर्वात्मना तां शरणं ह्यभीयुः ॥

दुर्गासुरो दुर्गममार्गभेत्ता
दुर्गेषु सम्यक् परितो लसत्सु ।
त्वां सर्वदां दुर्गतिहारिणी मां
विरश्चकारैष गतोपवर्गम् ॥

अतो हि मातु र्हृदयं पवित्रं
वात्सल्यपूर्णं नितरा मिहास्ति ।
अनेकवेधोण्डसुमातरं तां
ध्याये हृदाब्जे परमे प्रसीद ॥

जयप्रपूर्णे कृपयाभिरामे
जयप्रकाशेन विमर्शनाम्ना ।
जयामले सर्वगते सतीशी
सत्याह्वये दिव्यवचोविलासे ॥

श्रीमन्ति सर्वाणि जगन्ति यस्यां
ललन्ति या सर्वमतीत्य भाति ।
लावण्यसौभाग्यनिधानभूतां
त्वां चिन्तये श्रीललितां पराम्बाम्

श्रीचक्रवासि न्यमले त्वदीये
पादाब्जयुग्मे भवतीह भक्तिः ।
न तं त्यजे त्सविधाप्रशक्तिः
नैर्गुण्यसन्धानपटीयसं यम् ॥

सिद्धा भवे त्सर्वफलाभिवाञ्छा
सत्यं मुमुक्षा सफला भवेत्सा ।
जन्मादिषड्भावविकारहीने
मां पाहि पाहीति मुहु र्वदामि ॥

शत्रू ञ्जहि त्वं परमप्रमोदा
देह्यद्य सौन्दर्यविशेष मिष्टम् ।
कीर्तिप्रशस्तां विरलां प्रदेहि
जह्यद्य शत्रून् करुणां कुरुष्व ॥

अतोन्तरत्यन्त मिहाद्य शक्तिं
सर्वेष्टसन्धानपटीयसीं ताम् ।
सदा दधे मे हृदये सुरूपम्
लक्ष्म्याह्वयं तत्कनकाभिरामम् ॥

ये सर्वभावेन भजे भवानीं
भवेम सिद्धा इति भवयन्ति ।
न तस्य लोके रिपवो वसन्ति
प्रगीयते सम्यगजातशत्रुः ॥

जगज्जनिस्थित्ययहेतु मीशीं
त्वगादिधातुप्रभवेश्वरीं ताम् ।
नगाधिराजस्य हृदि प्रगीतां
तां गायदुद्धत्यनुषक्तचित्ताम् ॥

सङ्गीयमानामिह सप्तभि स्तै
रङ्गीकृतानङ्गमुनिं चिदीशीम् ।
सङ्गात्सतश्चि त्पयसां निधौ त्वां
भङ्गीभि रीड्यां सुतरङ्गमालाम् ॥

नवैव मार्गान्नुदुर्गमाया
श्शिवादभिन्नां शिवमन्ततीड्याम् ।
भवे भवानीं भवभीतिदात्रीं
शिवे सुचक्रस्थचिदात्मबिन्दुम् ॥

एकात्मन स्स्वस्वपरिपूर्णरूपात्
प्रकाशमाना नवतत्त्वयो याः ।
ताः कामदाः कामनया युता वै
श्रीकामराजादिरियं नु विद्या ॥

कृतिभर्तृकृतदेवीस्तुतिः

दुर्गानवरत्नी

निष्ठल सुब्रह्मण्य सन्यासिशर्मा

श्रीभारतोर्वीवलये पवित्रे ह्यान्ध्रप्रदेशाभिधराष्ट्रमेकम् ।
कृष्णानदीदिव्यतरङ्गभङ्गा नदी लसत्यत्र शुभेन्द्रकीलः ॥ १

तच्छैलपादेऽस्ति नदीपवित्रे वाटी शुभा सा विजयप्रयुक्ता ।
यत्रास्ति शैलाग्रगता परेशी दुर्गाह्वया स्वर्ण महः प्रकृष्टा ॥ २

वन्दे सदा तां कनकाभिरामां दुर्गामगस्त्यादि मुनिप्रतुष्टाम् ।
श्रीचक्र सम्पूजित बिन्दुरूपां नित्यां कलां षोडसिकां परेशीम् ॥ ३

रहस्यसाहस्रसुनामपूज्यां श्रीमातृनाम्नीं ललिताम्बिकामीम् ।
तिथौ च सम्पूर्णकलालयेऽस्मिन् मेषादि सङ्क्रान्ति पवित्रकाले ॥ ४

भृगोर्दिने वा निशिपूजनीयां देव्या अभीष्टे शरदुत्सवे वा ।
श्रीबिल्वपत्रैरपि कुङ्कुमेन प्रपूजितां विश्वशुभङ्करीं ताम् ॥ ५

नवार्णसन्मन्त्र विभावनीया वाक्काममध्यस्थितबीजमाया ।
चण्डञ्च मुण्डञ्च निहत्य याऽस्ते क्लीन्तोहि मन्त्रः खलुयां व्यनक्ति ॥ ६

यस्याः परं तत्त्वमहोनितान्तं श्रीसप्तशत्याप्रतिपाद्यमानम् ।
त्रिवर्गलाभः परमं फलं स्यात् महत्त्वपूर्णाः मयिदेवताः स्युः ॥ ७

वेदत्रयार्थः सुनिरूपितोऽयं दुर्गाम्बिका भोगसुमोक्षदात्री ।
तत् स्याच्चरित्र त्रितयै रहस्यं वृत्तैर्नितान्तं पठितं स्वशक्त्यै ॥ ८

एषा त्रिरत्नी नवरत्नमाला नयाशुभास्यात्प्रणवाभिरामा ।
कण्ठे धृता मानवमानवत्त्वं निगूह्यतां मानवतां व्यनक्तु ॥ ९

विमर्शानन्दगीतेयं नुतिः प्राकाश्य सिद्धिदा ।
सुप्रकाशविमर्शाख्यं वन्दे तत्सद्गुरोः पदम् ॥ १०

अभिप्रायाः

ब्रह्मश्री निष्ठल सुब्रह्मण्यशास्त्रिनामा अयं कविः स्वप्रणीत रचना विशेष विशिष्ठ चैतन्यनन्दनाख्य ग्रन्थस्थित पद्यानि गद्यानि च मामश्रावयत् । श्रुत्वाऽहमानन्द दन्तुरित हृदयोऽभवम् । अस्यां रचनायां सर्वशास्त्रसम्बन्धः मया अनुभूतः । विशिष्यचैतन्यनन्दन ग्रन्थे सर्वसगुणदेवतास्तुति नमस्कारादि श्रवणेन सर्वदेवतानां चैतन्यस्वरूपत्वं स्फुटीकृतम् । एत्र एव पूर्वकविभिः दर्शितः मार्गविशेषः । पूर्वकवीनां गीर्षु व्यङ्ग्यव्यक्तिविरहितं वाक्यं किञ्चिदपि न श्रूयते । तन्मार्गयियासूनां पद्धतिरिदानीमपि तद्वदेवस्फुरति । तद्दृष्ट्वाऽहं अश्रौषम् । तथैवसानन्दोऽभूवम् । इति मे सङ्गृहीतः अभिप्रायः । अत्रस्थिताः देवताः सर्वाः अपि अस्य भक्तिभावानुसारेण आयुरारोग्यादिकं दत्त्वा एतादृश ग्रन्थ रचनां अनेन कारयन्तु । स्वस्ति ।

'शतावधानी'
ब्रह्मश्री ताडेपल्लि राघवनारायणशास्त्री
चन्दवोलुपुरी, 7.1.87

श्रीमात्रेनमः

अयमन्तेवासी निष्ठल सुब्रह्मण्यशर्मा व्यरचय च्चैतन्यनन्दनं नाम महत्काव्यं महतादेवतानुग्रहेण । सकलदेवता स्तवरूपमिदं काव्यं महान्तं देवताप्रसादं हस्तगत मस्य करोतीति महान्तमानन्दमनुभवामि । श्रेयस्कामोऽहमस्य । एवमेव भगवदनुग्रहपात्रं ग्रन्थ जातं रचयन् आकल्प स्थायी भवतु चिरञ्जीव्यय मिति पुनः पुनराशासे – इति शिवम् ।

तेनालि
१२-१-८७

इति
पोतुकुच्चि सुब्रह्मण्यशास्त्री
व्याकरणविद्याप्रवीणः, उभयभाषाप्रवीणः
साहित्यालङ्कारः, सहस्रावधानी

ब्रह्मश्री सम्पन्नैः निष्टलोपाद्‌सुब्रह्मण्यशास्त्रिभिः विरचितानि स्वर्णधारास्तुतिः तारुण्यतटिनी हरिरसायनादीनि काव्यानि मया अवलोकितानि। सर्वा अपि स्तुतयः अतीव रम्याः अप्रयत्ननिस्सृताः गङ्गाप्रवाहवद्धारासम्पन्नाः शब्दार्थालङ्कार सुशोभिताः। तत्रापि तारुण्यतटिनी आचार्यश्रीशङ्कर भगवत्पाद विरचितसौन्दर्यलहरीव मनसो मुदमावहति।

'सुध्युपास्यः कथं चाहं भवेयं मध्वरे प्रभो।
धात्रंशं च त्वमादाय सङ्ख्यावन्तं सृजाच्युत'

इत्यादयः, एवं

'शरीरे विरटावासे पञ्चप्राणाश्च पाण्डवाः।
द्रौपद्या प्रज्ञया युक्ताः चरन्त्यज्ञातवत्सरम्'

इत्यादयः कवेः प्राण्डित्यप्रतिभादि विशेषान् प्रकटीकुर्वन्ति। कवि सत्तमस्य श्रीसुब्रह्मण्यशास्त्रिणः तारुण्यतटिन्या श्रीकण्ठशतकेन च आराधितौ पार्वतीपरमेश्वरौ सकल सौभाग्यानि कविताञ्च समेधयतामिति प्रार्थयामि।

'वेदशास्त्रभूषण' 'तर्कालङ्कार'

गोडा सुब्रह्मण्यशास्त्री

मन्त्रालयः

भवदीय काव्ये भाषां प्रति किमहं ब्रूयाम्? भवतां कळाशालध्य कत्वमेव विद्यातत्त्वं सूचयति । भवतां भाषाविषयेऽधिकारोऽस्ति भावेषु मह ममकारः विद्यते । सम्प्रदायबद्धा कवितेयम् । तत्र तत्र श्लोकाः पुनः पु पठनाय प्रेरयन्ति । रचनायां को लोपः? महान् सन्तोषः । आशीः ।

'सरस्वतीपुत्र' 'पद्मश्री' डाक्टर्
श्रीमान् पुट्टपर्ति नारायणाचार्यः
कडप

Phone No. office :2469 Grams : VIDYAPEETHA
Principal : Res. 2474

KENDRIYA SANSKRIT VIDYAPEETHA
TIRUPATI (A. P.)
(Rashtriya Sanskrit Sansthan, Ministry of
Human Resources Development,
Government of India)

F-No. Date:18-2-87

सरसमधुरगम्भीर काव्य निर्माणचतुरैः निष्ठल सुब्रह्मण्यमहोदयै रचितानि (१ स्वर्णधारास्तुतिः (२) कुमारस्तुतिः (३) गणेशपञ्चरत्नमाला (४) तारुण्यतटिनी (५) हरिरसायनम् (६) श्रीकण्ठशतकम् (७) श्रीशक्तिनुतिः इत्यादीनि स्तोत्राणि प्रत्येकशः पठितानि चेतसः परां शान्तिममन्दमानन्दं च जनयन्ति । मानसं भक्तिपरवशं कुर्वन्ति । अत्रत्यसंस्कृतभाषा निर्दोषसरस सरल मधुरवचोमयी सुहृदयचेतांस्यावर्जयतीत्यत्र न कापि संशीतिः । तारुण्यतटिनी स्तोत्रं पठ्यमानं वारं वारं पठनाय चोदयति अन्यादर्शी चित्तचमत्कृतिं चादधाति । हरिरसायनं भवभयतप्तानां रसायनंभवति । अनेकविधानि वृत्तानि समाहृतानि पुनः पुनः पठने आशां वर्धयन्ति पद्यानि भावगर्भाणि वैराग्य सञ्जननानि भक्तिवर्धकानि शान्तिप्रदानि विलसन्ति । प्राचीनकृतिकृतानीमानीवि वुद्धि समुत्पादयन्ति । स्तोत्राणमेषा निर्माला अयं निष्ठल सुब्रह्मण्यमहोदयः भगवतो वेङ्कटाचलपतेः अपारया कृपया आयुरारोग्यैश्वर्यसद्बुद्धिसम्पन्नः एवमादीनि रचयन् कवीनां विदुषां च संमानपात्रतामासादयन् उत्तरोत्तरं वर्धतामिति तमेव भगवन्तं प्रार्थये ।

'चतुश्शास्त्रपारङ्गतः'
एन्० एस्० रामानुजताताचार्यः

श्रीरस्तु श्रीशिवाय गुरवे नमः

श्रीमद्भिः निष्ठल सुब्रह्मण्य विद्वत्कविवरैः विरचितं चैतन्यनन्दना
पुस्तकं ग्रन्थप्रणेतृभिरेव पठ्यमानं सावधानेन अश्रौषम् । कञ्चित्कालं मत्सवि
निधाय कतिपयदिवसेषु लब्धावकाशः गुणदोषपरिशीलनदृशा सावधानचेत
प्रायशः आमूलचूडमद्राक्षम् । शब्दतः अर्थतश्च अतिरमणीयं सहृदयहृदयाह्
दीदं पुस्तकं पौनः पुन्येन द्रष्टुं औत्सुक्यं मनस्यासीत् । पुनश्च तत्रावलोकितम
चैतन्यनन्दन नाम्नि ग्रन्थे स्वर्णधारास्तुतिः, कुमारस्तुतिः, गणेशरत्नमाल
तारुण्यतटिनी, हरिरसायनम्, श्रीकण्ठशतकम् इत्यादयः दरीदृश्यन्ते । एत
ग्रन्थप्रणेतॄणां कविताचातुर्यं भावनावैशद्यं च विशेषतः उपलभ्यते ।

श्लो॥ सकलसचेतश्चेतश्चमत्कृतिं या च करोति गिरा ।
रचना सैव च रचना ......' इति महापण्डितवचनम् ।

श्लो॥ 'विद्वत्कवयः कवयः केवल कवयस्तु केवलं कपयः
कुलजा या सा जाया केवलजाया तु केवलं माया' इति वचनञ्च

चैतन्यनन्दननिरीक्षणेन अन्वर्थमिति प्रतिभाति । केषाञ्चित्कवीनां प्राक्तनसंस
स्कारवशेन अविदितमप्यर्थजातमौचित्येन भावविशेषगर्भितं स्वीय रचना
विनापि यत्नमन्तर्भवति । तदपि रचनायाः भूषणमेव । केषाञ्चिद्रचनासु का
हृदयं अनन्यवेद्यमिव भासमानं कविकर्तृकव्याख्या सापेक्षं भवति । केषा
त्कवीनां काव्यानि अन्यैर्व्याख्यातान्यपि आञ्जस्येन सामग्र्येणच कविहृदयाश
अयमेव वा अन्यो वा इति संशय जनकानि भवन्ति । यत्नेन कृतन्तु क्वचित्सर
पदवाक्यघटितं च भवति । तत्र रचना परिशीलनपराणां अन्वयबोधः रसा
स्फूर्तिर्वा न भवति । एवं विविधासु रचनासु सतीष्वपि श्रीयुत निष्ठल सुब्रह्मण
विद्वत्कवि विरचित मिदं चैतन्यनन्दनं प्रायशः सारल्यगाम्भीर्ययुतं नवनवयुक्ति
वर्णनयुतं च इत्यत्र नातिशयोक्तिलेशोऽपि । श्रीरामसीसमालिकानाम्ना आ

भाषामय पद्यरचनया आन्ध्रगीर्वाणभाषयो रचनासामर्थ्यं सुब्रह्मण्यसुधीन्द्राणा मस्तीति ज्ञायते तारुण्यतटिन्यां हरिरसायने श्रीकण्ठ शतके च बहुगम्भीरवर्णनं कृतमिति तुष्यामि । अस्य सरलटीका स्वीयाशय बोधनं रचिता चेदत्यन्तोपयोगाय कल्पते इति मे मनीषा । एते ग्रन्थप्रणेतारः लौकिके योगिनोऽपि मनसि परसम्प्रदायं निधायैव ग्रन्थं व्यरचयन् । एते बाह्यमर्थं च कीर्तिं च अकामयमानाः दैवानुग्रहमेव प्राधान्येन काङ्क्षन्ते । कराले कलिकाले सम्प्रदायग्रसनशीले ऐहिकामुष्मिकफलप्रदग्रन्थप्रणेतारः विरलाः । चिरञ्जीविनः सद्गुरुपरदेवतानुकम्पाभिलाषिणः निष्ठल सुब्रह्मण्य कविभ्यः नवग्रहाः गणपति कुमारपरदेवी हरिहरादयः आयुरारोग्यैश्वर्यं पाण्डित्यास्तिक्यज्ञानवैराग्यप्रदानेन सर्वथाऽनुगृह्णन्तु इति च आशिषः प्रयुञ्जानः, तदीय रचनां बहु मन्यमानः एवमेव आस्तिकजनतोपकाराय समीचीन ग्रन्थान् विरचयन्तु इति च सूचयन् मामकीनमाशयं निवेदयामि ।

'तर्कवेदान्तसम्राट्'
मद्दुलपल्लि माणिक्यशास्त्री
विजयवाडा

Prof. S. V. Joga Rao, M. A., Ph. D.
Hon. D. Litt. (A. U. & U. S. A.)
National Professor
Andhra University, Waltair. D/12-2-1988

FOREWORD

Here is a poetic work, 'Chaitanya Nandanam' by title meaning Universal consciousness coupled with Universal Bliss –wherein rich encomiums and eulogics replete with poetic flavour are paid to various Hindu mythological dieties who are allotropic modifications or manifestations of the Universal self.

The poet, Sri Nishthala Subrahmanyam, M. A. etc.. is a traditional scholor of the first order in Telugu and Sanskrit and his performance in this work is an acrobitic feat of intellectual gymnastics with word, and phrase which is elegant and quite commendable.

I see much bright future in his career and would like to wish him all prosperity.

S. V. Joga Rao

विशाखपट्टणम्
१०-२-८७

के० ए० कृष्णमाचार्यः
रीडर् , संस्कृतविभागः
आन्ध्रविश्वकलापरिषत्

चैतन्यनन्दन नामङ्कित मेतद्ग्रन्थरत्नं विविधदेवतास्तुत्यात्मकं विराजते। ग्रन्थेऽस्मिन् सर्वत्र प्राचीनानां महाकवीनां ग्रन्थेष्विव प्रौढता, कल्पनाचमत्कृतिः शब्दार्थालङ्कार सम्पत्तिः, भावगम्भीरिमा — इत्यादयो गुणाः दृश्यन्ते।

स्तोत्रग्रन्थाः ग्रन्थकर्तृणां भक्त्यतिशय प्रदर्शनार्थं मुद्दिष्टाः। स्तुत्यस्य महात्म्यमेव भक्तिभावस्य निदानं भवतीति भक्तिभावप्रकटनं स्तुत्य माहात्म्य स्फोरकं भवति। अतः प्रतिभावतां ग्रन्थकर्तृणां रचनासु देवताविषकवर्णनादिकं सहजसिद्धं समुल्लसति—

'स्तोत्रं नाम किमामनन्ति कवय' यद्यन्यदीयान् गुणान्।
अन्यत्रत्वसतोधिरोप्यफणितिः सा तर्हि वन्ध्या त्वयि॥

इति कस्यचित् सात्त्विकाग्रेसरस्य भक्तशिखामणेः सूक्तिः। एवंरीत्या रूपकाति शयोक्त्यादयो मानवादीनां विषये अलङ्कारा भवन्ति। परन्तु देवताविषये वस्तुस्थिति वर्णन परा एव भवन्ति। वस्तुतः देवतामहिम्नः वाचामगोचरत्वात् देवताविषयं वस्तुस्थिति वर्णनमपि समग्रतया कर्तुं न शक्यते। अतः कवेः प्रतिभाविशेष मनुसृत्य यादृशं वर्णनं प्रौढताविशिष्टं, कल्पना विशेष सङ्कलितं शब्दार्थालङ्कार सौष्ठव संयुतं, भावगम्भीरिमासम्भरितं विशिष्टं सम्पद्यते तत् सर्वं देवतामहिम्नोऽनुरूपमेवेति सम्भावनीयम्।

चैतन्यनन्दन नामकेऽस्मिन् ग्रन्थे निबद्धानि स्तोत्ररत्नानि तत्तद्देवतानां महिमानं सम्यग्व्यजन्ति।

ग्रन्थोयं प्राचीनानां महाकवीनां ग्रन्थैः सह स्पर्धते इत्यत्र न कापि विप्रतिपत्तिः।

के० ए० कृष्णमाचार्यः

स्वर्णधारास्तुतिः

वल्लि त्वत्पददासोऽयं क्षुब्धः प्रारब्ध जृम्भणैः ।
रोरुदीति विधित्सुस्ते स्तुतीः पक्षीव चङ्क्रमी ॥ १

विषैश्च नानाविषयैः विषयीकृतशेमुषीम् ।
विषापनुच्च वल्लीव वल्ली शुद्धीकरोतु नः । २

न कुमारी कुमारी च वल्ली वल्ली न सा मता
सेनासमाऽसमाखेन यो जानाति स पण्डितः ॥ ३

ऐहलौकिक सौख्यानि दात्री सा विमति र्न हि
मध्ये शाता चिरं शातं शान्ताशा सन्तनोतु नः ॥ ४

पुळिन्दचळिन्दसञ्चारः प्रचारो वेदपद्धतेः ।
आचारः स हि शिष्टोक्तः विचारश्श्रुति सम्मतः ॥ ५

या चैहिकानि च सुखानि ददात्यनुक्ता
उक्ता व्यपोहति रुजं मम मानसीं सा ।
तन्वी तनूकृतरुजं विरुजं क्रमेण
शुद्धं करोतु मयि मङ्गल मावहन्ती ॥ ६

स्वर्णांसो वितनुतं विनुते सुनेते
ते स्वर्णदी कनकसूनसमे मनीषे ।
स्कन्दे वृती विषमरोपसुरोपणानि
सन्धित्सुनी विवदमान सरोरुहाणि ॥ ७

समस्ते च लोके समस्ते विशेषैः
समास्ते भवत्युज्ज्वला मे शिवाय ।
समास्ते चितेः श्रीः न का केवलायाः ।
नमस्ते नमस्ते नमस्ते नमस्ते ॥ ८

अनङ्गस्य तन्त्रं भुजङ्गस्य राज्यं
भुजङ्गी सुकेश्ये लवाङ्गी च भृङ्गी ।
अनङ्गीकरोत्यब्जवृन्दे मृदुत्वं
समङ्गीकरोतु स्तुतिं मङ्गलाश्रीः ॥ ९

ध्याता वै देवतास्सर्वा त्यक्तास्सर्वाः क्रिया मया ।
त्वमेव ध्यायसे वह्नि नाम्नि स्वान्ते यतो मृदुः ॥ १०

लिलिक्षु स्सौन्दर्यं तव जननि वाचामविषयम्
श्रुतेर्मन्ये स्कन्दः श्रवणविकलोत्कृष्टनयनः ।
मिमंक्षुर्गानाब्धौ नयनमपहाय श्रवणवान्
अतावित्थं कालं गमयति परित्यक्तविषयः ॥ ११

अम्बिके विलसदम्बकयुग्म रामणीयकदिदृक्षुतया सः ।
त्वद्गुण व्रज निरूपणलोलः सन्दधार नयनानि श्रवांसि ॥ १२

वेणिकादर्शनश्रद्धः भुजङ्ग इति भावयन्
तस्य पत्नी रुजं भिन्तां स्वयं यो भुजगो बभौ ॥ १३

चक्षुष्यसहमाने ते तन्यातामच्युतं शिशुम् ।
गुणाधिक्येन मृदुनो चाद्वैतद्वैततो मिथः ॥ १४

तव सुरुचिर ववत्रे चन्द्रता नावभिन्ना
नयनमरुणतायाः लक्ष्यमास्ते च भवत्याः ।
लससि शुचितयानो किं समस्त प्रतीकैः
न भवसि यदि चित्रं मत्तमस्काण्ड मैत्री ॥ १५

मदीयं प्रारब्ध परममवरोद्धुं न कृतिनः
उपेक्षां वोढारः त्रिदिवनिलयाः बालकमिमम् ।
मदज्ञानध्वान्त स्फुरदरुणभाः भामिनि शिवे
पुरः कस्मान्नस्याः ? किमु वहसि वत्साय लघुताम् ॥ १६

नेत्रयो ररुणतामुपबिभ्रत् कृष्णतामपि च केशसमूहे ।
श्वेततां विरहतो वदनं स्यात् स्कन्दपूरुष सुकांक्षि सुखाय॥ १७

मल्ली कुवलय जाती चम्मक पङ्केरुहादि गणयुक्ता ।
वल्ली षण्मुख घटिता चित्रा दोधूयतां हि दुःखानि ॥ १८

शरजन्मनि सहकारे वल्ल्या परिवेष्टिते च रूप तत् ।
इहजन्मनि चाश्चर्यं दूरी कुरुते ह्यनन्त पापानि ॥ १९

सन्निधिमुपकल्पस्व सर्पीतिमविभिन्नताम् ।
शुद्धैर्ममतया युक्तैः संस्कारघटितैर्नरैः ॥ २०

लग्नं कुमारे यच्चेतः कस्यां यस्याः कुमारहृत् ।
पातु सा शापनिर्णोदा सुकुमारकुमारगा ॥ २१

आरुण्यलालित्यचणे कराब्जे श्रितौ च पादाविह भाग्यभाजौ ।
ते कल्पिषीरन् स्फुट पद्मताम्राः वाजीभ चिह्नं खलु सम्पदं नः ॥ २२

तन्वी मन्दगती रक्ता शुद्धा सद्गुरुतायुता ।
भाग्यरेखेव राजन्ती देयात्सुखमनाकुला ॥ २३

स्तुत्याऽनया प्रसन्ना स्याः स्फुटपङ्कजलोचने ।
त्वदन्यन्नैव जानीमः यदिच्छसि कुरुष्व तत ॥ २४

कुमारस्तुतिः

कुमारहन्तर्भुवनस्य शं मे कुमारतां देहि विवेकयुक्ताम् ।
कुमाप्रवृद्धि सुकुमारगात्र कुमार भो स्सम्यगुमासुत त्वमू ॥ १

दीर्घेव भित्तिर्नगराडभेदि कन्यादनुच्छक्तिधरः प्रसन्नः ।
पाणिः पुळिन्द्याः जगृहे च येन महेन्द्रकन्यासहितः पुनातु ॥ २

यस्तत्त्वमस्य दिवचो निरूप्यः ब्रह्मात्मको बालवटुः सुखाय ।
स ब्रह्मचर्यापरिनिष्ठितो नः स्वर्गाङ्गना भक्ति समर्चितोऽस्तु ॥ ३

गणेशपञ्चरत्नमाला

मुखेन गजराजत्वं कटिना मृगराजताम्।
बिभ्रद्भाति नराकारः दैवीः शक्ती ददातु नः ॥ १

बुध्या निरन्तरं श्लिष्टः सहस्राळ्युपसेवितः ।
अदिदर्शयिषुस्सिद्धीः पातूदासीन इष्टदः ॥ २

बुध्यासमेतोऽपि न यस्य बन्धः
सिद्धिं श्रितो विघ्नतमोऽर्यमा यः ।
प्रियारतौ विघ्नमुरीचकार
प्रेमास्पदः पातु स विघ्नराणः ॥ ३

य एकदन्तस्सुदती समेतः
यश्चेभवक्त्रः कमलाननाभाक्
यस्सिहचारी गजगामिनीभिः
श्रितोवितन्यान्मम चित्तशान्तिम् ॥ ४

चक्षुर्भ्यां पुष्पवत्वं च मन्दतां गमने वहन् ।
वित्वं गुरुत्वं भुवने भौमोऽस्तु स हि बोधनः ॥ ५

శ్రీ రామ సీస మాలిక

సీ॥ పొగరుమోతుల ద్రుంచి పుణ్యాత్ములను బ్రోచు
భవ్యాత్మ హృదనంతపంకజారి
గర్వితాసుర శిరఃఖండనైక గురుండు
గుణపక్షపాతి తాగుణ్యసుమతి
మాతృధీలోకిత మహిళాసమూహుండు
మరుగెల్చి నిల్చిన మంగళుండు
శరయోగనైపుణీ శంసితాచార్యుండు
శక్తి పంగూభూత శాత్రవుండు
దనుసుతధ్వజపతీధ్వంసన ప్రళయాగ్ని
దీనజనులను బ్రోచు ధీరవరుడు
వాల్మీకిమునిరాజ వందిత విజ్ఞాని
కారుణ్యవారాశి కర్మఠుండు
తమముబాపెడివాడు తారుణ్యగాత్రుండు
పరశురామమహాగ్ర్య భంజకుండు
సీతానయన భృంగసిత విస్ఫుటాబ్జంబు
సార్వభౌముడు కృచ్ఛ్ర సహనశీలి
గాలి భక్షణసేసి గరవంబు విడనాడి
దుమ్ముగ్రమ్మియ దార్ల దూవశిలను
పూతాంచకారాశు పూజ్యాంగ్రి త్రిలోక్యాపి
అమరాభివందితుండద్రిసముడు

జనతాభినుత్యుండు జానకీహృదయాబ్జ
మకరందపరిపాన మధుకరంబు
శబరీసమానీత సరసఫలాస్వాద
సంతుష్టిపరిదత్త సత్కృపుండు

తే॥ కపివరుండు గొలుచు కమనీయరూపుఁడు
పాపతతులనెల్ల పరిహరించి
తపములెన్నొ సలిపి ధన్యతా మునులచే
ప్రాప్యుఁడమృతమింక పంచుగాత.

तारुण्यतटिनी
नाम
(अनाथनाथास्तुतिः)

प्रियं गातेगाते मन इह च गाते सुनयने
क्षणात्तेऽङ्गानि त्वं स्थगयसि नु चिह्नानि वरदे ।
परन्तु प्रेयांसं नुदति भवती स्वान्तमगजे
अनाथानां नाथे चरणजलजं मे हि शरणम् ॥१॥

यदाजीवः पद्मं प्रविशति तदा तत्र कलना
वशीकुर्वन्तं सा च्युतमिह करोतीति विषयात् ।
श्रुतिर्ब्रूते मातः विषयकलनाभावसरणिम्
अनाथानां नाथे नयसि च कदा ? रोदिति सुतः ॥

सुजान्वोः पर्यन्तं तव वसुमती चाम्बपवनः
ततो वाः सप्तक्याः कमलवदने भर्गललने ।
हृदोवर्हिश्शुष्मा तत उपरि मूर्ध्नोहरिपदम्
अनाथानां नाथे रचितमभवत् ते वपुरजे॥

अहं रूपाजीवा पृथुजघन वक्षोरुह युग
प्रकुम्भद्धस्तस्यां विशदपदपादश्रितमनाः ।
प्रियं देवानां मां मतिकृतविषासक्तविगुणम्
अनाथानां नाथे शिथिलय महामोहतमे ॥

भणामो जिघ्रामः किमिह कवयामश्च श्रृणुमः
स्पृशामः पश्यामः भुविचविचरामो भवभयाः ।
अचैतन्यप्राणे जननि गुणयामस्तव गुणान्
अनाथानां नाथे गिरिशमुषिता यां तव दृशि ॥ ५

विनेन्दूरुाच्चितं न लसति यथा स्थाणु चलने
तथा विश्वं विश्वं त्वयि निवसति त्वन्मयमही ।
यथा मध्यादूवृत्ते समसरलरेखाश्च परितः
अनाथानां नाथे शिशुषु तव कारुण्यसुदृशः ॥ ६

कुहिंसाहिं सामे करुणरसधारा गुणमयी
श्मशानस्था हिंस्या दरुणिमनि मज्जत्पदयुगा ।
चिदग्निस्थे पङ्कं हरतु पदपङ्केरुहमिदम्
अनाथानां नाथे हुतहर शरीरेऽपरिमिते ॥ ७

अपानप्राणाख्यौ जननि पृषदश्वौ स्ववपुषि
विगृह्णन्नूर्ध्वं यः भवति विनिमग्नः परचिति ।
स धन्यः पुण्यानां शतजनिकृतानां शुभतनो-
अताथानां नाथे भणितिविनिचय स्तं प्रतिलघु ॥ ८

कदाचित्पीतश्रि श्रमकरुचि श्वेतसुघणि
सुगोध्यां कूर्चे ते परिलसति काश्मीरजननम् ।
हरिद्रान्नप्रीतेः गिरिशभुजसंसक्तवपुषः
अनाथानां नाथे तदिह मम सिद्धिं द्रढयतु ॥ ९

सुताल्वोर्मूनाभ्यां सुम्हदमवज्ज्योतिरमलम्
तदासङ्गया स्थातुं कृतिचिदवलासङ्गरहिताः ।
समर्थायन्ते भो जननि भुवि लालाटिकमपि
शुभम्युं कुर्याः मां कमलदळशय्याविलसिते ॥ १०

नितम्बिन्याः कैश्यं विषधरफणाद्दक्खलु शरः
वचोन्यासः खड्गः विषमयमरुत् श्वासपवनः ।
शिशावत्यन्तीने विषयविषपानाकुलधियि
अनाथानां नाथे वद कथमशिश्वी भवसि भोः ॥ ११

कवीनां द्राघिष्ठां रसमय महाकाव्य जननीं
अनिर्वर्ण्यां स्फूर्तिं ध्वनिपदगभीरां जनयसि ।
महावाणी वीणानिनदपरिक्षुण्णश्रुतियुगे
गमिष्यावोवाऽऽवां मणसि गिरिशं ब्रह्मभवनम् ॥ १२

समाकृष्टं हस्तैः गुहगणपतिभ्यां शिवयुते
सुहिङ्गूनां तैलैरपिकलित सत्सर्षपगणम् ।
क्वचिच्चोर्ध्वमग्नं परिमल समुज्झान्तरसनं
हरिद्रान्नं दृष्ट्वा न कथ मवटाटोपमितधीः ॥ १३

अणुस्त्वं चाकाशः त्व मणुपरिमाणं भगवति
द्व्यणूनामुत्पत्तौ द्व्यणुक परिमाणं तदपि च ।
घटानां लोकानां त्वमसि परिनिर्माण निपुणा
यतस्त्वं तद्रूपा चिदपि चिदधीनं जडजगत् ॥ १४

लुठामः क्रन्दामः सजलनयनाः स्मः हितदृदे
धरामोवैवर्ण्यं पुनरपि हसामः प्रतिदिनम् ।
न यावत्त्वं दृष्टेः भवसि विषयस्तावदरुणे
भवत्यां दृष्टायां स्तिमित मनसः स्याम जननि ॥ १५

निशा सर्वा मातः त्वमिति च ततो यामसमयः
शिवे काष्ठारूपा भवसि च निमेषोऽपि ललिते ।
द्रुतं त्यक्त्वा सर्वानवनि विषयानिन्द्रिय जयः
स योगी काले त्वां जनिमरणहीनोऽस्तु कलयन् ॥ १६

पदं मञ्जीरश्रीविजित परिवेषौषधि पति
शिवे लास्यस्थायास्तव हि भवतापक्षयकरम् ।
प्रपश्यन्तं नान्यं जगति च नृशंसे करुणया
अनाथानां नाथे मम शिरसि संस्थापय चिरम् ॥ १७

क्वचित्पङ्गुर्दृष्टः क्वचिदपिच कर्णेन बधिरः
क्वचिद्भ्रष्टास्याः हा क्वचिदनलतुल्यामयमयाः ।
अहं चार्तो दीनः कृतमतिदृशा मन्मथजिति
किमम्ब प्रारब्धं विघटयसि न त्वं क्षणयुगे ॥ १८

जगन्ति प्रोद्दग्धुं तत इत अधो दृष्टभुवनम्
शिखाः पिङ्गाःमध्ये सृजति तपनान् दिक्षु च बहून् ।
सरोवार्युष्णत्वं भजति महसा यस्य जननि
जिहीर्षुर्भर्गास्यादनलमसि धृत्याम्बुजमुखि ॥ १९

अधःपातं लब्ध्वा दुरितनिवहै श्शुद्धपदवीं
विवेकाग्नौ स्थित्वा भजतु तनयः पारद इव ।
अहो नाडी लोके चरति खलता वातकिनि व
न च ब्रह्मोयं मे प्रवह करुणाशारदझरी ॥ २०

शनैः कम्प्रं नेत्रं वितरति धनानीति सुमुखि
बुधस्त्वां श्लाघन्ते तव कुटिलतां केश निचये।
गुरोर्गेहे तारा त्रिभुजमपि सूर्यस्य निलये
धरन्ता ये सन्तः विदधति नुतिं त्वच्चरणयोः ॥ २१

रसस्योजश्शब्दे प्रतिफलति यद्वन्नगसुते
कला ते गात्रेषु प्रसरति जडं दीपयति सा ।
पदाम्भोजे भक्तिः मम तरलनेत्रे विजयतां
सुसम्फेटो वीरे विरह इव शृङ्गारवचसि ॥ २२

परिश्रान्तं क्षीणं विषयविषतापादवसि नः
मदीयाक्षिद्वन्द्वं विजलमतिदीनं मुनिनुते ।
तथापि त्वं मौनं वहसि किमु दीनावनकृपे
क्षमस्व श्रीः पुत्रं विगळितमतिं चार्तनिनदम् ॥ २३

यदक्षिद्वन्द्वं ते विघटयति बुद्धेर्विविधताम्
शिवस्यैकत्वं यत्तरलयति सुभ्रूविचलितम् ।
न निर्दिष्टं दिष्टं स्फुटसरसिजानि द्रुततरम्
सलज्जानि स्तम्भीभवति झषयुग्मं तदवतु ॥ २४

नमस्तस्यै देव्यै गिरिशहृदया या विजयते
शिवस्वप्नाऽघोरा शुचिरुचिररामा विलसिता ।
नभोवस्तारान्तः श्रुतिललनया योगिनिकरान्
पुनासि त्वं मातः शिववदनसद्दर्पणगता ॥ २५

सुधादात्री दात्री तम इह हि पात्रीकृतसुता
त्वयां धात्रा सत्रा भवति वरदाने हरिरपि ।
विधात्री त्वं त्रासो मम भवति कस्माज्जनिभयात्
सुतेषु प्रेमाणं दिशसि शरदीन्दुर्व जगति ॥ २६

न च प्राप्नश्मित्वां पुनरपि च रक्षेति जननि
जिघत्सन्तं पुत्रं विषयनिचयं हंसविनुते ।
महात्मानो लब्ध्वा पदसुमरजस्तातिरति वै
नियन्त्री कस्मात्त्वं न भवसि मनश्चापलसिते ॥ २७

मुखं मन्ये मातः क्षुपितगजकुम्भस्थनलिनम्
ससौरभ्यं नूनं कनककलशस्थं शुभविधौ ।
तमोमूढानां तत् तदिदमभिनवा भद्रवपुषः
तपस्कर्तुः पत्युः सुकृतनिकरं मङ्गलमुखि ॥ २८

मतिव्याघ्र्यासीने तरलतरमोट्टायितमुखम्
विलोक्याम्भोजश्रीः परिलपति गीर्व्यामरनुते ।
विसारोऽन्वर्थोऽभूत् विपुलनयनस्याम्ब पुरतः
श्रुतिं गामं गामं कुमुददलकान्तेरनुपमे ॥ २९

सरागोन्मत्ताक्षि प्रजितशफरीपद्मकुमुदम्
अराल भ्रूभङ्ग रिपुषु विजये वैष्णवमिदम् ।
श्रितानां त्वत्पादं सुमुखि पटु मन्त्रौषधि जये
शिवं स्वायत्तीकृत् क्षपितजनि शैवं विजयताम् ॥ ३०

तव श्रीनेत्रालिर्विरमति शिवे सम्भ्रमयति
पिनाकं सन्धर्तुः रुचिरकुसुमे स्वान्तमगजे ।
पिशाचीनां ही ही रव मकुरतोच्चाटित मजे
अनाथानां नाथे विरचयति मन्त्रज्ञपदवीम् ॥ ३१

शिशौ चिल्ले वेदे क्षिपति मनसः सान्त्वनकरि
श्रियः पुत्रः क्ष्वेडां गिळितगरळालिङ्गितकुचे ।
मरुस्थल्यां रक्ष्याः तनयमुदताप्यत शिवे
अनाथानां नाथे हिमकरशिरस्तारिणि परे ॥ ३२

नमस्यां कुर्वाणैः तुरगवदनैस्सेवितपदे
अनन्ताभिस्त्विड्भिर्जनयसि तनोः क्षीरजलधिम् ।
मदीयं तामिस्रं हर हर भुजोल्लासिनि चिते
सदातृप्ते मातः वितर मम सायुज्यपदवीम् ॥ ३३

गरिष्ठान् प्रज्ञाभिः क्षपितकुजनव्रातवचनान्
कवीन् शास्त्रप्रज्ञान् निखिलनिगमालोकरसिकान् ।
अनाथानां नाथे नतचितिपदान् वीक्ष्य तनयः
न चाहं स्पर्धिष्णुः प्रियवचनमग्ने विविदिषुः ॥ ३४

तुलाकोटिः काल्याः रिपुजनहृदुद्भेदनचणः
सहस्रारस्थायाः मृतिजनिजरानाशनपटुः ।
सितैः पीतैः रक्तैरसितहरितैरम्ब लसिते३५
समस्तान्न प्रीते जय विचर वीक्षामह उमे ॥ ३५

स्फुटाक्ष्णि त्वं स्थाणोः मनसिजविदाहे पुररिपोः
महामाये रौद्री प्रतिफलिथ त्वं जहसिथ ।
पुनः कामः प्राणानलभत कथञ्चित् स विशिखः
बबाधे त्वाञ्चसीः जननि नवतारुण्यतटिनी ॥ ३६

कथं विघ्नो मातः दशशतमुखैः हन्त युगपत्
रसज्ञेऽवस्थाभिः विलससि रसैस्स्थायिभिहमे ।
अलङ्कारै रम्या मृदुपदसमाभासिनि धृते
लभानि त्वां ध्यात्वा विहरिणि हि चिद्रूपकलनाम् ॥ ३७

त्वमध्वान्तं ध्वान्तं प्रकटय कलिध्वंसनपटो
अविद्यासञ्जातं शिथिलय हिमांशुप्रतिमुखि ।
कपोले ग्राहरते झटिति च करं सारयति मे
बलादाश्लेषायेति भ्रमसि शिवे हासवदने ॥ ३८

दधानाधानास्त्वं विमलवसने रक्षप्रकृतेः
कुचेलं मां त्रस्तं शिवविनयचेलोद्भवह्रियम् ।
गृहान् भव्यान् दात्र्याः दशनखकलासृष्टमुरनुत्
सुनैपुण्यं पुण्यं मम जयति भक्तावनपरे ॥ ३९

समग्रे चास्वाद्यामलकमरुणे ना हि लभते
नुतोग्रे माधुर्यं जननि जलपानादविकलम् ।
तथा षट्चक्रस्थां परममुनिसेव्यां भवहरां
धृतध्यानो मातर्लभति परचिद्रूपकलनाम् ॥ ४०

पवित्रे दुर्गे मामभरललनाकृष्टधिषणम्
विवेकश्रीपक्षं स हि विकुरुते हन्त मदनः ।
शिशुर्हित्वा हित्वा क्षणिकसुख सन्दानचतुरान्
चतुर्वर्गश्रीशानपि जननि संसेवत उमे ॥ ४१

अनन्तानन्तारः यदिह बिसतन्तुद्युतियुतम्
कुचाभ्यामाकृष्टं पुररिपुकराभ्यामवहितम् ।
त्वदीयं माङ्गल्यं बहुविधनुतं स्त्रीभिरमले
ससौभाग्यं भाग्यं हरतु विदधात्वम्बुजमुखि ॥ ४२

ससौरभ्यैस्सूनैः परिमलसमाकृष्टमधुपैः
निकुञ्जे वा स्थास्यन् मणिखचितराजन्यभवने ।
श्मशाने नीरावे विटपिनि गिरौ वा जलभुवि
भवन्नाम्नां स्थेम्ना दिवसनयनेऽहं धृतियुतः ॥ ४३

धरन् फाले स्वेदं कुचयुगलपत्राङ्किततनुः
सुहृद्दङ्गासक्तः मृदिननखचिह्नो नगजया ।
कुतस्त्वं चायासीरिति मुखसमाच्छादितह्रिया
मुहुःपृष्ठः शम्भुः दरहसितवक्त्रो विजयते ॥ ४४

नवे न्याये प्रत्ने फणिकृतमहाभाष्यवचने
अलङ्कारे वेदेऽखिलदिविषदाराध्यचरणे ।
परां निध्यायन् त्वां गुणमयि हि शास्त्रेषु वदते
नपीड्योऽपीड्यः स्यात् गतजनिफलैः संस्तुतमतिः ॥ ४५

झषैर्मैत्रीमक्ष्णोः निखिलशुकला संविलसिते
सुलौहित्यं पादे हिमकररिपुत्वं च वदने ।
गुरुत्वं कक्ष्यां त्वं रुचिरपदयोर्मन्दचलनम्
बुधत्वं जिह्वायां वहसि सितता ते शुभतनौ ॥ ४६

तव स्तोत्रं त्यक्त्वा निवसति न कुक्षिम्भरितया
यमश्चोग्रम्पश्यः खलमिह च वाचंयमतया ।
ददे नृभ्यः सौख्यं जगति विकलोऽहं समभवम्
स्तुते षड्भिर्वक्त्रैः शरवणभवेनाम्ब गिरिजे ॥ ४७

स्वदेहारीन् जित्वा भगवति समासक्त हृदया
महामाये मुक्ताः जितनिभृत दीपोपमधियः ।
प्रसार्योर्ध्वौ बाहू नयनजलरोमाञ्च सहितः
सुतस्त्यक्त्वा लोकानपि चरतु भूत्यञ्चितवपुः ॥ ४८

महीध्राः पञ्चास्याः विपणिचरणाः धिष्ण्यमनुजाः
सुराः कीटाः दैत्याः शुचिगगन भूवारि पवनाः ।
समस्तं त्वद्गात्रे विलसति सहस्राब्जवदने
पवित्रं ते रूपं मम नयनयोरस्तु पुरतः ॥ ४९

कला देव्याः कस्याश्चन पितरि दृष्टा सुकृततः
पदन्यासक्रीडास्खलितहृत शर्वेन्द्रियगणा ।
परित्राड्भिस्तत्त्वं पदघटित वाक्येन विवृता
चिदाभा सा भासा हरतु जडिमानं मम धियः ॥ ५०

अहं व्योमानन्तं मयि जलधरास्तारकगणः
महावायुस्कन्धा इति कलयसे चन्द्रवदने ।
न चाणुः कोऽप्यस्ति त्वदमलशरीरं तु घटितम्
पुनाना नानाम्रान् जयसि कमनीयेन महसा ॥ ५१

पुरायस्यासन् श्रीः महिषमुखरक्षांसि शलभाः
क्षमे दग्धुं लोकान् सपदि निखिलान् रक्तवदने ।
नमोवाकास्सन्तु प्रणतिपरगीर्वाण निचये
ललाटाक्षिस्थाव्याहतहुतभुजे मङ्गलभुजे ॥ ५२

पराहर्तुं पापं भव सुपयसा सिक्त तनुभाक्
जनन्यः सञ्जाताः गतजनिषु बह्व्योऽमृतगुणाः ।
परं पीयूषाख्यं वितर जननीत्वं मयि मने
पिबस्य स्तन्यं ते भवति मदिरा शास्त्रसरणिः ॥ ५३

सदापादं यस्ते स्मरति जननीनां जननदे
वरः सिद्धसिद्ध स जपति मनुं कालरहितः ।
सगास्मभेयेऽम्भोधिं स्थितिषु हि गिरीन् क्रामति यतः
विहाय त्वां दिव्यां क्षणमपि न च प्राणिमि शिवे ॥ ५४

बुधश्लाघया माता तुहिनकिरणोद्भासिमुकुटा
अज्ञानेत्रदृष्टि वदति गिरिजा पश्यसि कुतः ।
परब्रह्मावाप्तुं नयनपुरुषध्यानयुगिति
शिवोक्ता सा त्रीड्यन्नयनपरिभूताम्बुजकला ॥ ५५

शिशु क्षीरस्यन्तं त्यजसि किमु ? भीतिप्रदधनुः
स्त्रिभर्षिस्त्वं धर्मोद्धरणपटु दीनैकशरणे ।
भुजङ्गाकारं तत्र रिपुषु च वमद्बाणगरळं
अहेतुं भीतिं मे हर हरशरीरार्धलसिते ॥ ५६

सुतः प्रष्ठः शास्त्रे विचरतु शुकव्यास वचनैः
परं हृष्टे शिष्ठे सुममरुण रत्नाञ्चितरुचि ।
दशन्तं कीरं त्वं परिहससि वै दाडिमधिया
सखीर्दाम्ना गुप्तस्मित रुचिमुखी ताडयसि च ॥ ५७

विराजन्त्यां यस्यां जडमपि च चैतन्य सहितम्
असत्यां प्रागल्भ्यं वहदपि न किञ्चिज्जगति हि ।
सदादेहं प्राप्य स्थिति मवतनोषि त्वममले
वहन्तीमिक्षुं ता महमिह गिरा स्तौमि निपुणाम् ॥ ५८

शुचि ज्योत्स्ना वस्त्रा रजनिरमणी चन्द्रवदनम्
प्रसार्योर्ध्वं जातीकुसुमपरिहासा कथमपि ।
मदोन्मत्ता तत्त्वः रुचिरगविभङ्गान् गुणवती
मरालद्वीकर्तृं नभिजषति विज्ञातु मबला ॥ ५९

शिवा मह्यां मह्यं ह्यवतरतु कल्याणनिलया
पदन्यासे हंसी विकचनळिनीं मारुष्टु सुदृशा ।
तमोहीना शुद्धा तमसि ऋजुतादानकुशला
द्विसाहस्रं दोष्णां धरतु तपनाग्नीन्दुनयना ॥ ६०

त्वदीयं तारुण्यं ललितललिते रक्तिमयुतम्
सुधांशोरंशुभ्यः सकलकुसुमेभ्योऽधिकमहो ।
बलग्नं दृष्ट्वेशः विकसितमुखः स्मेरवदने
अभावोऽङ्गीकार्यो मनुत इति चित्रं नगसुते ॥ ६१

परिच्छिद्विभ्राट् श्री रगणितसुमाहात्म्य कलिते
श्रियो वक्त्रस्येन्दुर्भवति नियतं बिन्दुरमले ।
नवद्वारान्तस्स्ये सुमुखि बगळामुख्यमिनुते
त्वमेका शक्त्युद्‍धा त्वयि विमलभक्तिर्भवतु मे ॥ ६२

सर्वज्ञाय महेशांशभाजे श्रीशङ्कराय च ।
समर्प्यते नुतिरियं बालेन विहिता मया ॥ ६३

अनयाच महाराज्ञी प्रीणीतां च सदा शिवः ।
विच्छिद्य सर्वं बन्धान् मे देयास्तां मुक्तिमञ्जसा ॥ ६४

यदि श्री शङ्करश्लोक पदलेशस्य तुल्यता ।
मद्ग्रन्थे च तदाधन्यः मादृशां कुत्र सादृशा ॥ ६५

तारुण्यतटिनी ग्रन्थरसं जानन्तु पण्डिताः ।
देयाच्चतुर्वर्ग फलं पठ्यमाना नुतिश्शुभा ॥ ६३

सुब्रह्मण्यः कविर्भाति निष्ठलान्वयसम्भवः ।
सन्यासि शर्मणः पुत्रः योऽकरोन्नुति मीदृशीम् ॥ ६७

हरिरसायनम्

श्रित्वा निवृत्तिपथमुद्धत नास्तिकत्वैः
पत्युः कलां मधुरिपोस्समवाप्य शुद्धैः ।
स्तुत्यां द्युसत्पथचरैः हृदयात्सरन्तीं
नारायणस्तुति मिमां समुदीरयामः ॥ १

सदामोदरतो रक्ष्यात सुदामोदरतुष्टिदः ।
सदामोदरदेवो वः गदया दरया नुतिम् ॥ २

ऐहलौकिक सुपारलौकिके कर्मणी न करवाणि माधव ।
किन्तु ते पदयुगस्य संस्मृतिः लभ्यतां धिषणया विशुद्धया । ३

त्रस्नुना भवभयोन्मदिष्णुना किन्वकारि वृजिनं परात्पर ।
न त्वविष्णु रहमाविभावयन् क्षमापयामि रविचन्द्रलोचनम् ॥ ४

राधिकां विरहतापितां नुवा इन्दिरा क्रुधपसारणाय वा ।
खण्डिताधरविचुम्बनाय वा रक्षणाय तनयस्य यास्यसि ? ५

अलीलवः पद्मभवाय शास्त्रं महार्णवे मत्स्यवपुस्तरङ्गिणि ।
अनाविलोत्फुल्ल सरोरुहद्युतीः क्षित्यङ्गनायाः सुदृशो विभेजिथ ॥ ६

जलधर रुचिरं समवेक्ष्य यं श्रीः भृशमभितप्तमृणालबाहुयुक्ता ।
चरणसलिलजं विलोक्य हृष्टा चिरमभिताडयति स्म लीलयाऽऽयात् ॥ ७

निरन्तरानन्दसमार्द्रबाष्पे पुनःपुनारुद्ध वचः प्रवाहे ।
देवाधिदेवश्च चिरन्तनश्च स्थास्नुर्मयि स्थापयतात्पदानि ॥ ८

पापीयसाऽखण्ड्यत खण्डिताधरः मयाह्यवारुद्धमुखं विलज्जितम् ।
मोट्टायितान्यानन विभ्रमाश्च मां दहन्ति विष्णो किमुपेक्षसे सुतम् ॥ ९

पुत्रो ममायं मम तत् कळत्रं संसारबद्धस्य च वासनाभिः ।
पुत्रस्य चोन्माद परिभ्रमिष्णोरक्ष्णोर्नकिं भासि ? दयापयोधे ॥ १०

कामोऽपीप्य द्विषय मदिरां फुल्लशुक्लाम्बुजाक्ष
क्रूरं सूनुं जटिलविषनुत् शाधि वाजीशगन्तः ।
क्रुन्मोहारी नयनजलजे भीषयामासतुम्ते
शान्ति त्यागं मुनिजननुते सर्वहृत्संस्थ दित्सु ॥ ११

नानाकर्मसु मोहितं मुनिजनसंस्तूयमान प्रभो
त्वद्रूपामृतहृदिनीं जिगमिषुस्वान्तं जगाभ षितम् ।
व्यापारेषु विवेकशान्तिदमितैः सन्त्यज्यमानेषु खैः
साह्लादं शतशो विलोकन शरैस्सन्ताड्यमानः कदा ? १२

कविता तवपादसेवने मम धन्या हि निरन्तरं प्रभो ।
करुणामधुनोनृपावळिः त्यजनीयोत्पलपङ्क्तिरञ्जसा ॥ १३

गोपी गोपितशोणगण्डयुगला कल्हारशय्यास्थिता
वेण्वाराव निशामन व्यवसिता सत्याच सत्यं मुहुः ।
आश्लिष्टा बहुचन्दनेन कुचयोः पद्माहतभ्रूभ्रमा
राधा रोदिति शङ्कते च जलजा भक्तश्च सम्मूर्छति ॥ १४

शतभूपति दत्तराज्ययुक् तरुणीविभ्रम हृच्छराञ्चितः ।
न च साम्यमवाप्नुयाद्ध्रुवं हरिकारुण्यपयोधिविप्रुषः ॥ १५

नीलाम्भोधर विग्रहाय खजिते कम्बुभ्रमाद्भार्गवी–
कण्ठं स्पृष्टवते सुदर्शनसमं देवीनितम्बद्वयम् ।
नेत्रे ज्योतिषि सर्वलोकविषयान् प्रत्यक्षमातन्वते
सन्तु श्रीनळिन विहार रसिकाग्रण्यैः नमः कोटयः ॥ १६

नानारोग भुजङ्गदंश विवशाः क्रोशन्ति रुद्धेन्द्रियाः
पाषण्डा अपि पूर्वमुद्धततया जिज्ञासवस्तार्किकाः ।

कामानाप्तु मनन्ततन्त्र विविधोपायाश्रिताः केचन
सर्वेषामपि रक्षणं विदधतः कीर्तिश्च ते लुण्ठति ॥ १७

त्वदीयशस्त्रक्षतपूतगात्राः सायुज्यमापुस्सुरविद्विषः प्राक् ।
प्रह्लादबालो ध्रुव आततान भक्त्य मुदं दैन्यजडोहऽमेव ॥ १८

चेतस्सरः काम भुजङ्गपंडितं सद्वृत्तयस्त्वां शरणं समागताः ।
कदा ह्यधिष्ठाय च काममस्तकं सुताय वैकुण्ठपदं प्रयास्यसि ? १९

जडे किमस्तीति मदेन ताडितं विभिद्य च स्तम्बमरूप्यथाः स्वयम् ।
बिभेदिथ त्वं हि जडैर्नखैः प्रभो अतो हरित्वं नरपूर्वमागतम् ॥ २०

शनैश्शनैस्सङ्कुचितात्मपादः तिमिङ्गिलास्यस्तव उद्धतेस्मिन् ।
सभ्र सदासीर्भ्रमफेन बिन्दुः उदन्वति त्वं ह्यविभो महीभ्रम् ॥ २१

कमठवपुषो वामाक्षिश्रीर्भुजङ्गवधूमुखं
तरलयति च भ्रभङ्गानां सहस्रमवासृजत् ।
उदकतिमिनक्राणां रावैः चचाल सघट्टनैः
गिरिरपि भवांश्चैको बभाज जयश्रियम् ॥ २२

घर्मं लिलङ्घिषुजनान् कुजनान् श्वतुल्यान्
क्रोष्टॄन् समूलमिह पातय भीमरूप ।
राजत्कुठाररुधिरारुणकान्तिलक्ष्मन्
बम्भ्रम्यमाण नवकोकनदाक्षिशोभिन् ॥ २३

राज्यत्यागाय विपिने वासमाचरते बुधे ।
नमो गुणसमुद्राय दमिने धर्मिणे नमः ॥ २४

पादं यस्याक्रमद्बालः पदैराक्रामतोजगत ।
वामाक्ष्य विप्रलब्धः सः पुरो वर्वर्तु वामनः ॥ २५

ओष्ठभ्रभङ्गदृक्पाते गोपिकामोददायकः ।
बिसिनीनालमुत्सृज्य सत्यया ताडितोऽवतात् ॥ २६

पयसस्तस्करायास्तु नमोमुनि नुताय च ।
यथेच्छं भक्तचित्तेषु चरते सत्यभाषिणे ॥ २७

भिन्नैर्वादैश्चतुर्धा निहतदितिसुतः वञ्चयन् श्रुत्यनर्हान् ।
व्यासभृङ्गाळिमश्राव्यध्वनिचकित सुरस्त्री सहस्राणि जित्वा ।
ज्ञात्वा वेदान् समस्तानुरनिशदि चान् शान्त्यहिंसोपदेशा
सर्वज्ञः पातु युष्मानिह जितभुवनः शर्वरीशद्युतीर्भाक् ॥ २८

नृगास्त्रियः कामवशात्समाभवन् चकार य स्ताः नृपतीन् दयामयाः
समारुरोहाशु हयं कृपाणयुक् कलेर्भवं कल्कमिदं व्यपोहतु ॥ २९

यावच्च महिषारूढः नागच्छति दृशोः पुरः ।
तावदेव जरामृत्युनाशकं नाम भावये ॥ ३०

त्यक्त्वान्यानि च कर्माणि शास्त्राणि विविधानि च ।
कार्यं हि विदुषा नित्यं श्रीशाङ्घ्रिद्वयसेवनम् ॥ ३१

रुद्धेषु खेषु मृत्यौ च सम्प्राप्ते न हि रक्षिता ।
वृद्धिरेव स्वपोनश्च हनस्तोऽचिण्णलोरिति ॥ ३२

बन्धुभ्यस्सर्ववस्तुभ्यः काले ग्रसति मानवम् ।
दयालोः करुणादृष्टि पुनाति नहि मूलकम् ॥ ३३

शब्दानां घटतात्यादिवादो वा च प्रवृत्तिषु ।
निवृत्तप्रेषणापक्षो वा न पाति परात्पर ॥ ३४

त्वं सेव्यस्त्वं हि विज्ञेयः दृश्यः श्रव्यो निरन्तरम् ।
ध्येयस्त्वमेव विश्वात्मन् नैवाणुः परमो भुवि ॥ ३५

ऊर्ध्वपुण्ड्रं निधायाशु क्षणं सम्भाव्य केशवम् ।
तुलसीदळभोक्ता चेत् मृत्युं तरति निश्चितम् ॥ ३६

गोपिकानिहित चन्दनं धरत्
राधिकास्तनविघट्टिंव प्रभो ।
इन्दिराकलुषिता दृशो भरत्
ते वपुर्मनसि राजतां मम ॥ ३७

क्षीरोर्मिषु त्वं जलजं निरीक्ष्य पराहतं वीचिभिरर्णवस्य ।
क्षणं विभाव्यस्मितशोभितौष्ठः सविभ्रमां पश्यसि पङ्कजाक्षीम् ॥ ३८

शतदोषतितिक्षया हरे शिशुपाले करुणातिवर्षिता ।
अथ मत्पुरतो न भाससे न हि युक्त समताममत्वभाक् ॥ ३९

स्मृतयो गतजन्मसंस्पृशः प्रतिरुन्धन्ति तवाङ्घ्रिसेविनं माम् ।
पथिकञ्च सुधार्णवं त्यजन् तृषितो हन्त यियासुरन्धुगर्तम् ॥ ४०

प्रणमय्य पदे न दीयतेचेत् मम चित्तं परमा कला त्वयाऽहो ।
धिषणागतसंस्कृतिर्भवेद्वै विषयाकृष्टमनाः हतो भवेयम् ॥ ४१

सुध्युपास्यः कथं चाहं भवेयं मध्वरे प्रभो ।
धात्रंशं च त्वमादाय सङ्ख्यावन्तं सृजाच्युत ॥ ४२

खलस्य खलु सम्पर्कात् सज्जनो दुर्जनायते ।
पूतानेक त्वदङ्घ्र्योश्च सेवनात्पण्डितः पुनः ॥ ४३

दुर्जनेष्वतिकाठिन्यं वहता शिशुना तव ।
तितिक्षा सम्परित्यक्ता मत्तः पापी तु को वद ? ४४

रमणीरमणीयशोणनेत्र स्फुरणसहस्र विकम्पितान्तरङ्गः ।
दधदेष हरिश्च शङ्खचक्रौ मनसि ममास्तु हि गोपिकासमेतः ॥ ४५

शेषशयन भक्तपालक द्रुतमुत्तिष्ठ च शङ्खचक्रयुक् ।
गरुडोपरि पद्मया लसन् मुक्त्वा दिविजान् पुरो मम स्याः ॥ ४६

पातालपदाम्बुजाय पत्ये सारसनस्थभुवे प्रभासि धाम्ने ।
स्वर्गं शिरसा धृताय भूम्ने सन्तु नमांसि समस्तजीवनाय ॥ ४७

वैद्यज्योतिष मन्त्रविद्द्विजवरो यद्वान्त्यवर्णोनरः
दाक्षीपुत्रवचस्सु तार्किकनये लब्धादरो वा बुधः ।
शय्यारीति सुवर्णगुम्फनपटुः वाग्मी कविर्वा प्रभो
अज्ञाते समये हठाद्यमवशः तस्माद्धृदि त्वं भव ॥ ४८

श्रद्धां शक्तिं देहि वेदान्ततत्त्वे शास्त्रेषु त्वं लोकतन्त्रेषु मैवम् ।
यस्मिन् कस्मिन् मास्तु कांक्षाहि मास्तु त्वत्पादे धीरस्तु मे चास्तु चास्तु॥

मच्चित्ते विदधाति पद्मनयनः भावान् मनोहारिणः
येनेदं विततं समं जगदिदं पूषेन्दुतेजोमयम् ।
उरीकृत्य च दास्यतां मुनिगणः यस्यास मुक्तस्सुखी
सश्रीमानवतात् पुराणपुरुषः नारायणो मां शिशुम् ॥ ५०

चलच्चञ्चरीकं सरच्छोणरागं सरःपङ्कतुल्यं मुखं वीक्षमाणम् ।
नमस्काललिमभ्रू विलासेन लक्ष्म्या मुनिस्वान्तभासि प्रभोरस्तुतुष्ट्यै॥ ५१

स नानाख्यमानाधरोत्सारिहासः समुद्रात्मजा कुन्तलश्रीसमेतः ।
तदेवाशु कुर्वे तदेवेतिगन्ता मदीयेऽस्तु चित्ते दयालुर्दयालुः ॥ ५२

वलाहके प्रौढिमजृम्भमाणे सुग्रीवचित्रे हरिकम्पहेतौ ।
आगच्छ भक्तावन बद्धदीक्ष अचञ्चले मौनिनि नीलकण्ठे ॥ ५३

प्रतिभा प्रतिभातु भारतीकरुणायाः त्वयि सेवनप्रदा ।
परिरम्भसुमृष्टचन्दने कुपिते मार्जति पत्रलेखिकाः ॥ ५४

देहेन्द्रिय स्वान्तमतीर्विहाय लयालये स्वादि पिपीलिकायाः ।
शेषे च शेषे मदुदात्मवेत्तः इति स्तुतस्त्वं ह्यव सिद्धमासिन् ॥ ५५

लक्ष्म्यालिङ्गन सम्भवं मकरिकापत्रं स्ववक्षस्स्थले
मीनश्रचञ्चितचक्षुषं हसमुखं ह्याब्धेश्श्रियं बिभ्रतम् ।
तापस्याशु शमाय वारि लहरीसक्तां परीक्ष्य श्रियं
सम्पूर्णेन्दुमुखो निषिध्य च तमः प्रोद्भूय तां मत्पुरः ॥ ५६

एतादृशं रक्षितुमात्मयोनौ देवैरनेकैः परिवारितस्सन् ।
कलेशं महान्तं च मदर्थमाप्य संरक्ष विश्वेश न चेद्यशो न ॥ ५७

यद्वा क्षमस्वाशु मदीयवाक्यं यदृच्छया कल्पितलोककोटे ।
स्तनन्धयं वाच मुदीरयन्तं यदृच्छया संक्षमते हि तातः ॥ ५८

दारिद्र्येण च पीडितोऽस्मि ममताहीनैः नरैर्वञ्चितः
अस्वास्थ्येन च शैशवे बहुकृशः कांक्षाधिकत्वप्रद ।
तैस्तैस्संवर्जितं विशेषदुरितैः मोहात्मकैः चेष्टितैः
आश्चर्यं च कथं नु पासि वृजिनास्पृष्टैकचूडामणे ॥ ५९

जिनो ह्य जनतां त्यक्त्वा वृजिनाजिनदेहिनम् ।
राजि नम्राभूनजनान् परे त्वं त्वयि पालय । ६०

व्यष्टोभिष्ट गरिष्ठ दुम्र धिषणः कस्को न शुष्कध्वनिः
नाचेष्टिष्ट नल ष्ठतंग्म विकरस्फेष्ठश्च राज्ञां हहा ।
बन्धस्तब्धमुखस्त्रिविष्टपगणो ज्ञानं स्म योगो विदे
न षष्वष्कत यस्य घोरपरशोर्भीत्या च तस्मै नमः ॥ ६१

मृत्युर्नमामेति च सार्वभौमं गण्यं च पाशात्मसु विश्वमूर्ते ।
त्वया न चास्मर्यतरक्षणं मे पापिप्रसङ्गोऽपि हि दुःखहेतुः ॥ ६२

ईर्ष्या पुरस्तान्मदनः परस्तात् लोभक्रुधौ पार्श्वचरौ महात्मन् ।
पापेन तृप्तो मरुता करीन्द्रे मदाश्रिते मोहपुरीं चलामि ॥ ६३

नामतेऽनिशं निशं समालिहान् नो पिपासुतां क्षुधं च वा भजे दयाब्धे ।
रामरामरामरामया दृशाऽऽस्व रमाभिरामया भुवोऽव कृष्णतन्वा ॥ ६४

नमस्सुधाभयाय ते यते यते सुधामदर्शिने निरीक्षणाय भोः ।
समाहितेपु माहितेषु तेषु किं उपेक्षया पते निधस्स्व रक्षणम् ॥ ६५

पटीर लिप्तसर्वाङ्गः भक्तिदोऽभक्तिदोऽवतात् ।
अविभक्तो विभक्तस्सः भक्तदो जीवनाय वः ॥ ६६

मायागोपनितम्बिन्यः प्रविलाप्यात्मनि प्रभुः ।
भक्तेभ्यो नवनीतं सः नवनीतं ददातु च ॥ ६७

गोपीःप्रतार्याशु चुचुम्बिषूस्ताः तमालवृक्षान्तरितः किशोरः ।
भावान्नव स्थायिन आसमीक्ष्य तासां पुरः प्रादुरभूत् कलाज्ञः ॥६८

स्वरसाद्वृक्षान्तरितं न वेत्सि समुक्तवन्तं तरसा रसज्ञा ।
मञ्जारसञ्जात सुमञ्जुराबा साखञ्जमुत्कञ्जविशेषभाञ्जी ॥ ६९
स्वचक्षुषी कज्जलशोभिनी हृत्प्रस्पन्दिनी मन्दगती वहन्ती ।
इन्दिन्दिरं निन्दति सुन्दराङ्गी इन्दुश्रियं भिन्दति मित्रविन्दा ॥ ७०

यावत्समालिङ्गितु मुज्ज्वलाङ्गी कैरये समन्तुष्यति चित्तवृत्या ।
हसन्मुखश्रीः नवमेघकान्तिः अन्तर्बभूवात्कटधूर्तताविद् ॥ ७१

सुगुरु नितम्ब बिम्बविचलद्रुचा सुकाञ्च्या
मरकतरत्नगुम्फनमनोज्ञया विपञ्च्या ।
विरहवराङ्गना श्वशनपद्मगन्ध भर्त्या
भुवि वनमालि लम्बितनितम्बतो निपेते ॥ ७२

जाम्बूनदश्रीपरिवेष्टिताङ्ग्या जम्बूफलस्थापितनीलनेत्र्या ।
सन्दृष्ट गोविन्द विलज्जिताक्ष्या श्रीजाम्बवत्या रुरुदे लुलुण्ठे ॥ ७३

लग्नावलग्ना हरिरम्यबाहौ दाम त्यजन्ती नवमल्लिकानाम् ।
नेत्रेऽरुणत्वं चिकुरेषु नैल्यं ऊरौ च कम्पं बहुसम्भमार ॥ ७४

तां रुक्मिणीं लालनया बभाण कालिन्दिनीनीलिममिश्रितानि ।
पद्मानि सौगन्ध्य मनोरमाणि तानि स्पृशन् सौख्यनिधावमज्जम् ॥ ७५

निशम्य कृष्णस्य वचांसि मुग्धा मोहङ्गता मौनमशिश्रयत्सा ।
वाता परागान् क्षिपताऽश्रभाजा वह्नेःकणान् तत्र समीरणेन ॥ ७६

चन्द्रे पटीरत्विषि शाम्बरारे शय्योपधाने कुमुदं दधाने ।
सरुक्मिणीं तां यमुनातटीषु पदानि सन्दृश्यं तिरोबभूव ॥ ७७

रम्भावने क्रौर्यमिहावहन्त्यां शक्त्यां मदं सम्मुषि कामलक्ष्म्याम् ।
सत्याच साऽसत्यवचः प्रवीणं सचित्तदाहं दहतीत्यरोदीत् ॥ ७८

समायुषि कृष्णमुखेन्दुबिम्बे पत्या कचेन स्तनयोरपाति ।
अकोचि युग्मेन कपोलयोर्हिं व्यचारि नेत्रेण विचारिलेन ॥ ७९

वासोमदीयं बिभृयात्सराक्ष मामेति दैन्यानि समुद्बभार ।
दया क्व ते निर्घृण इत्युदीर्य विहाय तं सा भृशमारुरोद ॥ ८०

गोपिकया धृतं च सरसिजकुमुदचयं
कज्जलकीर्णगण्ड किसलयमरुणमभात् ।
स्वेदनलश्च यूनि निपिपतिषति परमे
वक्षसिचालिलिङ्ग सकुसुमशरहृषितः ॥ ८१

इत्थङ्कारञ्चरतुवनितालग्नदृष्टिर्मुरारिः
शास्त्रे वादैः सकलमनुजैः पूज्यतामाबिभर्तु
मायारूपः मुनिगणशतैः स्तूयतां मन्त्रवर्णैः
मन्नेत्राभ्यां पुर इह कथङ्कारमालक्ष्यते न ॥ ८२

कदा भवान् मां परिशिक्षणाय सम्प्रेर्य विष्णो वृजिनं भिनत्सि ।
यथाकथञ्चित् वृजिनं कलौभवेत् धराम्बुपेक्षां तवनैव विन्धो ॥ ८३

वात्रज्यमानतनये विषयेषु लोभात्
तातप्यमान हृदयेऽपि ननेऽस्ति चिन्ता ।
आसञ्चिनोमि कलितः वृजिनानि विष्णो
नैवाश्रयामि तव पादमनाथ बन्धो ॥ ८४

न वेदबोधोऽभिधया कृतार्थः मैत्रीवचोनैव पुराणसिद्धम् ।
व्यङ्ग्यं न कान्ताकलितं कृतार्थं दृष्टिस्त्वदीया तमिनं पुनातु ॥ ८५

माता मोहपरायणा जनक आमग्नो मुधा कर्मसु
विक्षिप्तो मम सोदरः प्रकृतिभिः बद्धा च मे सोदरी ।
संसारे सुजनद्विषि प्रियतमा मत्कण्ठबाहुद्वया
मत्तोऽह नळिनी दळाम्बुकणवन्निर्लेप मामुद्धर ॥ ८६

नासास्मर्यंत मीननेत्र हि भवान् मेदीनवारान्निधिः
संसारे बहुयोजनानि सुखधीः आशीविषेऽहं गतः ।
दूरे सर्पफणा स्वतीत जनिषु क्रीडानिमग्नं शिशुम्
त्वं पश्यायतलोचनाहिशिरसि न्यस्तात्मपाद प्रभो ॥ ८७

यद्वाश्रीकुचमात्मचिन्मकरिकापत्रञ्च वीक्षस्व त
न्नूनं सागरमग्नमव्ययगजं सर्वज्ञचूडामणे ।
नीवाराग्रसमान सूक्ष्मधिषणाभागे विलक्षिप्यते
कर्तव्यं तव विद्युदोपम लसच्छ्रीनेत्रसत्कज्जल ॥ ८८

त्वच्छीर्षं व्योमनेत्रे तपनहिमकरौ वायुरास्ते च कण्ठे
पादः पाताललोकः हृदि तव च शिखी वारि चोरौ पदे भूः ।
ब्रह्माण्डानां शतानि प्रकटयसि तनौ वारिबिन्दूनिव त्वं
एतत्सर्वं स्तवानां जनयति लघुतां हन्त किंत्वा ब्रवीमि ॥ ८९

कालोऽम्बुदश्चञ्चलया समेतः लतासमालिङ्गितवत्यशोकम् ।
सनीलकण्ठोऽपि च नीलकण्ठीं एवं वदन् पातु जनार्दनो माम् ॥९०

तद्गात्रनैल्यं तम आभिनत्तु रागस्त्वदीयाङ्घ्रिणरजो विहन्तु ।
सत्त्वं मदीयं विलयं समेतु त्वद्रूपमेवास्तु दृशोः पुरो मे ॥ ९१
सत्यं श्रुतौ सत्वमयीं प्रतिष्ठां सत्यस्थितेभ्योह्यददा ऋषिभ्यः ।
ऋचाऋतं ते यजुषा विदं च साम्नामुदं हन्त वय श्च विद्मः ॥ ९२

विजृम्भमाणे हृषित मधौ त्वां पूजां विधास्ये मधुभीरसज्ञम् ।
फलानि ते सम्प्रददामि विष्णो शक्ति स्त्वदीया वचसा मगम्या ॥ ९३

स्रष्टरि लोकविधातरि चाणुषु कर्म भवन्ति च चेतनलोकाः
पद्मविलोचन ! निर्मितकर्ममम प्रभजन्ति फले सुखदुःखे ।
ज्ञानधनञ्जयनाशित सञ्चित कर्मसु ब्रह्म ददाति दयाब्धिः
स्तोतृजनेषु स निष्कपटां करुणां सृजतीति न चित्रम् ॥ ८४

जगतां स्रष्टृ तद्ब्रह्म सर्वज्ञं सर्वशक्तिमत् ।
तत्त्वं सर्वात्मना भासि स्वरमिच्छा विनिर्मितम् ॥ ९६

भक्ते स्सोपानमार्गं विदधति भवति-प्रेमसिन्धौ मुरारे !
मर्त्येषु धृक्षु सत्त्वं रजसि च तमसि क्षुद्रभोगांश्च लिट्सु ।
विश्वं सम्प्लावयन्त्यां त्रिपुररिपुजटाजूटसम्पावितायां
गाढाशे बालिशाः के क्रिमिकलितवसामूत्रयुक्ते च कूपे ? ९६

अज्ञाने नशिराजि नाशमहिते चन्द्राधिकाह्लादके
कामे च प्रदरिद्रति ध्वसि रुषि प्रग्लायति द्विड्गणे ।
जीवे ज्योतिषि चोर्ध्वमुत्क्षिपति चिद्रूपे विलीने त्वयि
या रम्या च दशा विभाति सुजनः कस्तां नचा काङ्क्षते ॥ ९७

चित्ते ग्लायति दुर्गुणैः प्रकृतिजैर्नष्टे विवेके पुनः
क्षीणायाञ्च मतावनित्य विषयव्रातेषु तत्त्वेऽस्फुटे ।
फक्कडकुचैरगलुञ्चयट्श्विवचुगः टाप्चावनीयल्लुकः
रक्षन्तीति च नैवधांरिननिशामत्रादयो मूलिकाः ॥ ९८

यद्येन्द्रजाले जगति स्थितेऽस्मिन् किं तत्र निद्राभिरनुज्ज्वलाभिः ।
जागर्ति विद्या सुखदा तु चैका सेवापदद्वन्द्वमनन्तमूर्तेः ॥ ९९

भीतावयं बहुतिमिङ्गिल नक्रभीमं
वीक्ष्याम्बुधिं भवसमं प्रकटं गभीरम् ।
उद्दृप्तनागविषजर्जरिताः फणीन्द्राः
जाने कथं न भुजगे ह्युषितो हि शेषे ॥ १००

मत्कृतानाञ्च पापाना मानुगुण्येन शिक्षणम् ।
दत्त्वा च भगवान् देवः समदृष्टिः प्रसीयताम् ॥ १०१

मां स्तोतुं न हि तेऽर्हता मयि परित्यक्तक्रियैः मौनिभिः
स्तुत्योऽहं क्षपितात्मकल्मषदरैरित्याशु मेवं क्रुधः ।
पापेष्वेव दयोचिता यदुपते निर्व्याजकारुण्ययुक्
पाषाणेष्वपि चन्द्रिकां हिमरुचि र्दाता न चायाचितः ॥ १०२

धर्मार्थकाममोक्षाणां चतुर्भिस्त्वं भुजैर्नृणाम् ।
ददासि त्वत्समः कोऽन्यः त्वामेवातो भजाम्यहम् ॥ १०३

यद्वा धर्मार्थकामांस्तीन् काङ्क्षिणां नैवदास्यसि ।
दोषादनित्यदानेन मोक्षमेव ददासि हि ॥ १०४

चतुर्बाहो मुक्तिं न वितरसि पुत्राय यदि हा
तदा शम्भुं देवं दशभुजमहोत्साह वरदम् ।
कुमारं भक्तज्ञं व्यधिकदशबाहुं परिचरे
अतो मे कर्तव्यं वद रुचिरकान्ताधरपिब ॥ १०५

आरक्तेऽर्धनिमीलितेऽक्षिण सुदृशं संस्थाप्य दुग्धाब्धिजा
रागे वृद्धिमुपागते पुलकिता कृष्णेन पृष्ठा पुनः ।
रम्भाद्यप्सरसां गणस्य पुरतः सार्थव्ययवैयर्थ्यधीः
तां लक्ष्मी मुपसान्त्वयन् मुररिपुः वः पातु सर्वात्मक ॥ १०६

सर्वासु दिक्ष्वीक्षितपद्मनाभां लज्जाकुलामर्धनिमीलिताक्षीम् ।
हसन् तया मर्षधिया च दृष्टः मे स्थीयतां चेतसि धर्ममूर्तिः ॥ १०७

त्वया सिन्धौ वेदानवनपटुना संविचरता
समुद्रान्तर्भाम्यद्द्विभुजगसञ्चालितजले ।
प्रतिस्पर्धाक्रध्यत्तिमिकृतसमावर्त शतके
न काचित्त भीतिः स्मरणवशतो भीरजनि मे ॥ १०८

सूपशास्त्रपरिनिष्ठितो यथा वीक्ष्यभोज्यमनु तद्रुचिवक्ता ।
तद्वदेव हि नरानभिवीक्ष्य त्वं मनोजनित भावविदग्र्यः ॥ १०९

अपादपादो मकरात्करीन्द्रं ररक्ष रक्षांसि शरैर्विनिघ्नन् ।
निनील नीलोत्पलमक्षि लक्ष्म्याः समां स मां पातु य आलिलिङ्ग ॥ ११०

पृथ्वीं शासति चक्रवर्तिनि कलौ कामक्रुधौ मन्त्रिणौ
सर्वेणापि च कर्म कारयति हा पापं हठान्नोत्तमः
धर्मं व्यापयति प्रणाशयति तैः लोभादिभिस्सैनिकैः
साङ्कर्यं समतिष्ठिपद्द्विजगणानग्लापय द्रक्ष नः ॥ १११

भवं सतापश्च स यादवो दन्नवाभ्ररुक्छामयतूप्रवाधिनम् ।
पुरा महाब्धौ मकरान्मतङ्गज ररक्षिथ ग्राहमपीति विस्मयः ॥ ११२

मासि मासि पराजेतुमेकैकस्त्वन्मुखश्रियम् ।
शोणिमानि च रोचींषि रुषा बिभ्रन्निशापतिः ॥ ११३

अप्राप्य विजयं कृष्ण पाण्डुतां गमने वहन् ।
फुल्लोत्पलाक्ष्यां पश्यन्त्यां रजन्यां याति निर्मदः ॥ ११४

निर्द्वन्द्वो द्वन्द्वरूपोसि निष्क्रियो रक्षको विभुः ।
श्रीवत्सलक्ष्यो निर्लक्ष्यः भासि त्वं भासि निर्मलः ॥ ११५

लक्ष्मीकुचद्वय पटीरसमुद्रितोरः
सन्दृश्यमाननखलक्ष्म समुज्ज्वलाङ्गः ।
भ्रूनेत्रकज्जल समाङ्कित नीलगात्रः
विभ्राजसे शुचिरसस्तनुमामनन्त ॥ ११६

क्वचित्स्मितविभूषितो नवसुराङ्गनाविभ्रमी
क्वचिद्द्विजसमञ्चितो हसितयानिवालक्ष्यते ।
क्वचित्पदनिषेवकस्तुतिगणान् समाकर्णकः
विभातु जगतां गुरुर्मनसि मे तमोहारकः ॥ ११७

भक्षितशेष सुगन्ध मनोज्ञः भक्तजनार्पित माषमनीषः ।
मन्त्रितुमत्र निवेदित चोऽयम् भक्षयति प्रथमं परिपातु ॥ ११९

शरैस्ताडितो मान्माथैरम्बु नेत्रः द्विभावोऽवतान्नः दयाब्धिर्दयानिधिः ।
शरान् तोमरान् कुन्तलान् सत्कृपाणान् रुषाखण्डयन् भूमिपुत्रस्य दीप्तान्

सद्यश्छिन्नकृपाणधारिविगलत्कण्ठासृजा भैरवं
भ्राम्यत्कङ्कणनिस्वनाः च्युतरुषः दृष्ट्वा कुठारं ययुः ।
पूर्वार्धे वय साश्रितः पललवैः पार्श्वेऽत्र सन्निहितः
भीभत्सश्च भयानको विजयतां रौद्रस्तनूमान् रसः ॥ १२०

चाणूरं बद्धमुष्टिं प्रहरणशतसम्भिन्न वक्षस्स्थलं तं
उत्प्लुत्योत्प्लुत्यचोद्धृयविघटनधीः सक्थिपादूरुमुष्टिः ।
भिन्दन् छिन्दन् निरुन्धन् पुनरपि निपत न्नूर्ध्वगादं मनीषी
नासारन्ध्राद्वमन्तं घननवरुधिरं चूर्णपेषं पिनष्टि ॥ १२१

स कृष्ण स्तनुमान् वीरः चेतसि द्योततां विभुः ।
सदा ननरकान् कुर्वन् नरकारिः नरोत्तमः ॥ १२२

आक्रम्यैकपदेन सार्णवमही माकाशमन्येन हि
शीर्षे स्थापयितुं य एष उदभूत् राज्ञो बलेर्वामनः ।
याते वासुकिसद्म हन्त नृपतौ विश्वं त्वमेवाखिलम्
इत्युक्ति सफलाञ्चकार विरजाः सर्वान्नियन्ताऽवतु ॥ १२३

कापालिके खड्गयितुं प्रवृत्ते ज्ञात्वा तपस्वी न हि किञ्चिदूचे ।
विचार्य लीलाकलितं स्वदेहं सर्वात्मभावस्तनुमान् स शान्तः ॥ १२४

दग्धे शरीरेऽपि यतीश्वराग्र्यः मौनी परं व्यासपथानुयायी ।
सर्पे रमण्यां कनके च लोष्ठे समा मतिर्यस्य स शङ्करोऽवतात् ॥१२५

रसैस्समस्तैरुपशोभिते स्वे सद्भारतीरञ्जित भारते यः ।
अपुस्फुरच्छान्तरसं महान्तं पराजतां ब्रह्मविदग्रगण्यः ॥ १२६

त्वद्दीयमानसुखलेशलवोऽपि विष्णो
सम्भ्रान्त मूढमनसा विषयेषु लब्धः ।
मन्दस्तथापि विषपूरित सर्वगात्रः
त्वां रोदिमि शकुनोपम एष दीनः ॥ १२७

बन्ध्वादिपञ्जरसहस्रमवेक्ष्य दीनः
कामादिनिर्दयकिरातशराभितप्तः ।
पक्षी नभःप्लवनकर्मणि तोषमेतु
माकाङ्क्षते चरति रोदिति खिद्यमानः ॥ १२८

कामे विवृद्धे सुजनस्य कोपे शान्त्यां विनाशं भजते न चित्रम् ।
अम्भोधिनीरेऽतितमां प्रभूते तत्रैव नाशं नबहिः कदापि ॥ १२९

अम्भस्तरङ्गोपम लोकतन्त्रे ज्ञात्वापि सूक्तीर्दधते कुबुद्धिम् ।
व्यपोह्य मायां हृदयात्पुनीहीत्यभ्यर्थना ते भुवनाधिपाय ॥ १३०

शीतं वाः कुमुदेन्दुचन्दन जपापुष्पोपसेव्यं मुदा
गोक्षीरेण ददाति पायसमिदं हैयङ्गवीनं प्रभो
मालेयं तुलसीदलैर्विरचिता कुन्दप्रसूनैर्युता
कर्कन्धूकदलीफलानि मधुभिः पूर्णानि गृह्णीष्व भोः ॥ १३१

त्वद्भक्त्या वहते जलार्द्रनयनः हस्ते स्रजः स्थापयन्
विष्णो त्वं फफल नि भुङ्क्ष्व मधुना हृक्पेयचूतानि च ।
द्राक्षायाश्च रसं हिमाम्बुलसितं गृह्णासि नोचेदहो
सामर्षाऽभिमुतानिरस्त बहुशः मां निन्दितास्यच्युत ॥ १३२

लक्ष्मीबन्धुरकैशयवासित सुमाधिश्यं न पुष्पेषु मे
राधामञ्जुलहस्तदत्तपयसः स्पर्धिष्णु न श्रीपते ।
द्राक्षां गोपनितम्बिनीमुखरुचा शुभ्रां मनोरञ्जनीं
नोदास्यामि परन्तप प्रणतिभिः पूजां करिष्ये ध्रुवम् ॥ १३३

लज्जालू रसना स्खलद्गतिरहं त्वां वक्तुमेवं प्रभो
प्रह्लादध्रुव बालकेष्विव नमे भक्तिः स्थिरा सात्त्विके ।
यद्भावेत्सि दशां दशास्यमदविध्वंसिन् जनिध्वंसकृ
सर्वेषां हृदि ते चरस्य तनयः किंवक्तु दीनाम्बुधे ॥ १३४

लक्ष्यो नो भवितासि यावदमलः शेषे शयालो सुखिन्
आकृत्याच झषस्य मञ्जुलतमो लक्ष्मीसमालिङ्गितः ।
तावद्रोदिति लुण्ठति प्रलपति प्रम्लायति ग्लायति
मूर्छां विन्दति तापमाभरति ते पोताय माशोचति ॥ १३५

सचेताः प्रचेता चितस्तेसुसेके अशक्तः कटाक्षाद्भवौ सो विचेताः ।
सवर्हिहिंद हेप्यशक्त्या सचिह्नः अशूरस्ससूरो विमानादरक्तः ॥ १३६

सदागतिर्निर्गतितां प्रपेदे वेदोघनिर्वेदगुणं बभार ।
आत्मानमिन्द्रो न हि संविवेद यमस्समाशिश्रयदञ्जसा यम् ॥ १३७

मनुष्यधर्माप्यमनुष्यधर्मः ईशोऽप्यनीशोऽप्ययतन्त सिद्धौ ।
सन्नेरतोऽप्यात्मविवेकमिच्छुः त्वां तादृशः कः खलु वेत्ति सम्यक् ।१३८

वामे चक्षुषि संस्फुरत्यति रमां त्वत्तापसम्पीडिता
लक्ष्मीनेत्रयुगे च विभ्रतशतं गोविन्द । सम्बिभ्रति ।
पद्मे मीलति पुष्पधूळिरुदने भृङ्गा झटित्याकुलाः
प्रम्लायन्त्यरुणोत्पलानि बहुशः कम्पीनि मल्लीप्रिय ॥ १३९

जातो वन्दिकुलेऽद्भमच्युत सरोवायौ समासादति
रोलम्बेषु नदत्सु पङ्कजकुले निद्रां विमुञ्चत्यहो ।
मन्दं मीनकुले जलोर्मिषु लुठत्यन्तर्निमग्ने दले
अन्तःकर्दमपद्मनाल विदलद्रेणौ जके क्रमति ॥ १४०

वायौ बुद्बुदरूपतामुपगते चोर्ध्वं समागच्छति
वृत्ताकारतया समागतवती रेखा ततोऽन्यापि च ।
किञ्चिद्भिन्नवराटकाक्रमितया तुच्छद्वीजेष्वितः
तिर्यक्सारसपक्षिणि व्रजति वाजान्तरत्र पत्रे चले ॥ १४१

शैवालेषु चलत्सु भेपुसमयेऽतीते इयं भाक्वहो
नालेऽम्भोनवयस्य रम्यनटाचञ्चू समुच्चालितः ।
वक्त्रं त्वं विजिगीषुरेषकुमुद श्रीतस्करश्चन्द्रमाः
लक्ष्म्यालिङ्गित पद्मनेत्र शयनादुत्तिष्ठ संरक्ष नः ॥ १४२

दृष्टिर्याकुमुदानि लज्जयति धीः भाभति यस्याः पुरः
पद्मं क्षमापयति श्रियं पुलकय त्यौद्धत्यभाक् दुर्धियः ।
रक्षो वीजयतीन्दुबिम्बमनिशं संहेपयत्यव्यया
तुल्या भातु रमादृशो ह्यनुपमा भक्तावने श्रीपतेः ॥ १४३

द्रष्टव्यं किमु ? नीलतोयदवपुः कृष्णस्य सौख्याम्बुधेः ।
श्रोतव्यं किमु ? नाम कोटि जनिषु प्राप्तांहसः क्षीणकृत् ।
कर्तव्यं किमु ? नूत्नमञ्जुतुलसी पर्णैस्समासेवनम्
ध्यातव्यं किमु शास्त्रवादरचनालभ्यं परं ब्रह्म सः ॥ १४४

आहाराः शयनं स्रजः कविवचः प्रौढा नवा कामिनी ।
शास्त्राणां पठनं न चापि श्रुतिवागुद्यानवापीतटम् ।
रोचन्ते न हि मेऽम्बुदोपमतनो ब्रूमो वयं त्वा किमु ?
प्रारब्धं विघटय्य कौस्तुभरुचा चागंस्यते वा त्वया ? १४५

दृष्टे ज्योतिषि पुंस्यजे न हि बहिस्संस्थीयते चेन्द्रियैः
कूर्मस्सङ्कुच दिन्द्रियैः स्ववपुषि प्रायेण संवर्तते ।
यद्यागच्छसि नीलतोयदरुचं दास्यामि किन्तेऽनघ
नारङ्गं कदळीं नु वारिचषकं माल्यं नवं मौक्तिकम् ॥ १४६

वेदान्तैरनुसंनिरुध्य मुनिभिः लोलोक्यमानो हरिः
विद्याकुक्षि महागणाधिपतिना तोष्टूय्यमानोऽनिशम् ।
आदित्येन्दु कुबेरमुख्यदिविजैःसंस्तूयमानो मुदा ।
अज्ञस्याशु कथं नमेरुवकुलाम्भोजानि गृह्णात्यजः ॥ १४७

श्रीनारायण पद्मनाभ हनुमत्संसेव्य दामोदर
श्रीमोहिन्यवतार रक्षितशिव प्रह्लादबालप्रिय ।
तार्क्ष्यं पार्श्वगतं पयोधिविचलड्डिण्डीर बिन्दूञ्चितम्
आरुह्यस्तुतिपाब्रितं सकमलः तूर्णं समागच्छ विरु ॥ १४८

ताक्ष्यारूढ पयोधिवीचिषु पदे संलक्षयन् कोमले
हंसीनां गतिविभ्रमं प्रकटयन् पद्मभ्रमेणाच्युत ।
श्रीताम्बूलमनोज्ञगन्ध मिळितास्यामोदमास्वादयन्
दत्त्वा दिव्यदर्शी कदा मुररिपो दृश्यो भविष्यस्यज ! १४९

धूर्तानां व्यवहारतो मुररिपो कुक्षिम्भरीणां भुवि
स्वार्थाय प्रतिहन्यते जनमुखं चित्रा खलानां गतिः ।
तान् लोके प्रनिमज्जतः करुणया धर्मद्विषः पातु ते
दृष्टिःसंक्षरितामुरी सुमनसां दत्तामृता सुन्दरी ॥ १५०

कर्णाधार विहीननौरिव जले सन्ताड्यते जीवितम्
शोचिष्केश शिखेव भोगधिषणा कामैर्भुजङ्गैः प्रभो ।
मोहो वाति समीरणः तरळितैरम्भोभ्रमैरावृतः
शान्त्या वागुरया शमादि सखिभिः संरक्ष सम्प्लावक ॥ १५१

भुक्त्यै कीर्त्यै न प्रयोज्यं कवित्वं दैवी शक्तिः काचिदत्यन्तगोप्या ।
भक्त्या पादौ श्रीपतेः सम्प्रणम्य शुद्धं स्थानं ज्योतिषो यातु मर्त्यः॥ १५२

भक्ता सा शिथिलोटजोर्ध्वे विनमच्छाखासमालम्बिभिः
भूमौ पत्ररथैर्विपाटितफलं भोवत्री परब्रह्मधीः ।
अश्वत्थस्य तरोरधः स्थितवती त्वां सेवमानाऽचला
धन्याज्ञाशबरी फलं हि तपसां विष्णु स्मसंलोकते ॥ १५३

सद्राक्षा कदलीशिवा मरुवकश्रीपर्णचाम्पेयके
मन्दारैविंशदैस्तथाकुरवकै क्षौद्रप्रपूर्णैर्मुहुः ।
जम्बीरान्तरितोडुराजकिरणैः भास्ये तले निर्मले
त्वां सम्पूज्य मुमुक्षुरास विपिने नानाफलैः स्वादुभिः ॥ १५४

शरीरे विराटावासे पञ्चप्राणैश्च पाण्डवैः ।
द्रौपद्या प्रज्ञया युक्ताश्चरन्त्यज्ञातवत्सरम् ॥ १५

बुद्धिं ग्रहीतुकामो वै दुर्भावः कीचकाऽधमः ॥
रुद्ध्वा कथञ्चिदसुना हतो दैव बलेन सः । १५

सपत्नान् कामलोभादीन् कथञ्चिज्जयकाङ्क्षया ।
प्राणाः सम्प्रेरयामासुः सर्वज्ञं हरिमादरात् ॥ १५

सन्धिं विघटयामासुः दुर्भावैर्मनुजैर्युताः ।
जिघृक्षन्ति स्म चिद्रूपं कुधीभिश्च रज्जुभिः ॥ १५

वासुदेवो दयासिन्धुः पाण्डवान् संरिरक्षिषुः ।
स्वयञ्च सारथिर्भूत्वा भगवान् दीनपालकः ॥ १५

पाण्डवैर्योधयामास कुभावान् रणमूर्धनि ।
जाते नृशंसे समरे हतास्सर्वे तदाज्ञया ॥ १६

न्यस्तात्मानः त्वयि परकलावैभवे पाण्डुपुत्राः
भक्तिश्रद्धाशमदम सदाचार वैराग्ययुक्ताः ।
ज्ञानाम्बोधौ पुनरपि पुनः मग्नमग्ना निरीहाः
त्यक्तश्रीका हहह ममता बन्धहीनाः विमुक्ताः ॥ १६१

तादृशो हि महान् देवः सर्वज्ञ स्सर्वशक्तिमान् ।
देवाग्रचः वासुदेवस्त्वं किंमां नावसि माधिक ॥ १६२

भावांस्तरङ्गान् बहुधा वहन्ती स्रोतस्विनी धीस्सुकवे र्हि मन्ये ।
अनाविलं काव्यरसं मुरारि पादाम्बुधिं मन्दगतिः प्रयाति ॥ १६३

कर्णेन्द्रियं समाश्रित्य सङ्गीतव्यसनेन वै।
गोपिका वेणुपाणिं त्वां मुनीनां दुर्लभं ययुः ॥ १६४

अबालयसुताकान्तः अबालयतिनां वरः ।
अबालयस्त्वं सुजनान् अशालय इहासुरान् ॥ १६५

पद्मालयेति तवसार्थकृतास्तु नाम्नः
इत्युक्तवन्तमनिशं हरिमासमीक्ष्य ।
हस्तान् समीक्ष चतुरो नयने च पादौ
लज्जाविलोलनयनां परिपातु पश्यन् ॥ १६६

प्राणेषूपरतेपु पञ्चसु हठात्क मेन दुष्कर्मणा
बुद्धिं ग्राहयति स्म मोहनृपतिः वैराग्यवासोयुताम् ।
नित्यानित्यविवेक भक्ति शमसद्भावेपु पश्यत्सु हा
ब्रह्मज्ञानसुवृत्ति वस्त्रनिचयं विष्णो कदा दास्यसि ! १६७

यातया या तया बुध्या त्वा मद्दश्यत मङ्गला
आह्लादह्लादिनो देव ! सर्वेभ्यस्तां प्रदेह्यज ॥ १६८

अपठितमपि शास्त्रं स्फोरयत्याशु बुद्धौ
कृतदुरितचयानां प्राग्विनाशं करोति ।
त्रिगुणघटितनृभ्यः साधुमार्गं प्रदर्श्य
वितरति बहुदानः ज्योतिषः सौख्यधाम ॥ १६९

ससुरः पूतधिषणः बली बलिविनिग्रहः ।
अबलासहितस्सबलः हन्स्वहङ्कारभावना: ॥ १७०

रेवतीवदनसन्मधुपायी रेवतीस्तनफलाश्रितवक्षाः ।
नीरजाक्ष इह सीरकरोऽयं रक्षतादखिलवीरवरेण्यः ॥ १७१

नीलाम्बरादादिमपूरुषोऽव्यात् नीलाम्बरः कृष्णसमीपगामी ।
नीलाम्बुजाक्षिद्वयशोभया यः नीलाम्बुकर्ता स्फटिकस्य भूमौ ॥ १७२

सकामपालोऽवतु कामभावात् सकम्पनेत्रः स्थिरतां प्रदेयात् ।
यो धार्त्तराष्ट्रान् मुसली सलीलम् पारेऽम्बुधि स्थापयतिस्म क्रुद्धः॥ १७३

श्रीरेवती नेत्रयुगस्य वृद्धेः सङ्कर्षणः पातु विशाल नेत्रः ।
सङ्कर्षणः कर्षतु सन्निकर्षं विभिद्य चित्तं परमात्मरूपः ॥ १७४

परास्तु चन्द्रांशुषु वायुघर्षणात् रजस्सु मन्दार मरन्दगन्धिषु ।
विकीर्णकेशा इव सङ्कुलाळिभिः लताः पिकानां ध्वनिभिर्विचुक्रुशुः ॥

वियोगमाप्तो जनकात्मजायाः शक्तोऽपि दग्धुं भुवनानि वीरः ।
प्रारब्ध माश्रित्य रुरोद यो वा शोकस्तनूमानिव पातु रामः ॥ १७६

शब्दो व्याकरणेऽपि वादसमयौ तर्केग्रहाणां विदि
साहित्ये रस एव च श्रुतिषु सद्ब्रह्मकमव्याहतम् ।
काणादे त्वमणुर्हि कर्म निगमानुस्यूतशास्त्रे खलु
भक्तिर्भक्तजनेषु भासि परमोद्योङ्कार एव प्रभो । १७७

त्वयि लीनो जगत्प्राणः त्वयि लीनं सुखं सुखम् ।
त्वमेव च जगत्प्राणः तदासि नहि किञ्चन ॥ १७८

प्रद्युम्नदीप्तिर्जयतु ब्रह्मचर्यादृढव्रतः ।
चञ्चलासन्निधि जयतु नित्यं भवतेष्वचञ्चलः ॥ १७९

धृताङ्गरागः श्रीविष्णुः वनमाला विभूषितः ।
तुलसीदळसम्प्रीतः कौस्तुभोद्भासितोऽवतु ॥ १८०

पुराशेतेस्म श्रीविष्णुः शेषोपरि जगत्प्रियः ।
जातौ जगद्द्रोहकरौ राक्षसौ मधुकैटभौ ॥ १८१

ताभ्यां दिविषदो भीताः देवीञ्च शरणं श्रिताः ।
देव्याज्ञयेन्द्रः कीटस्सन् विष्णूद्बोधनवाञ्छया ॥ १८२

ददंश मौर्वीं शार्ङ्गस्य मया कृत्तं शिरः प्रभोः ।
सन्दधुर्हयशीर्षं ते तस्य विष्णोर्महात्मनः ॥ १८३

हयग्रीवस्त्वमेवासि नैकविद्यानिधिः परः ।
निरक्षरपि दृशा बभूवुः पण्डिताः पुरा ॥ १८४

हयग्रीवो मदीयायां जिह्वायां नटतात् चिरम् ।
सर्वशास्त्रार्थ सन्दायी रक्ष्याद्वाणी गुरुः प्रभुः ॥ १८५

हयग्रीव ! महाबाहो ! शुद्ध ! पावितलोकक ।
सिद्धां सरस्वतीं देहि स्थिरा भव च चेतसि ॥ १८६

खद्योतित सहस्रांशुः सर्वकाङ्क्षाविधायकः ।
सर्वज्ञशिष्यः पायान्मां निराधारं स्तनन्धयम् ॥ १८७

हयाननः पातु शुभाननो मां स्पष्टीकृत श्रीललिता मनुश्रीः ।
स ध्यानमात्रेण समस्तविद्याः ददातु शुभ्रीकृत दिक्समूहः ॥ १८८

कर्तृत्वं प्रकृतेः दत्त्वा य औदासीन्यमात्मनः ।
साङ्ख्ये प्रदर्शयामास पायात्स कपिलो नरान् ॥ १८९

पायादत्रिसुतः श्रीमान् दत्तात्रेयः श्रियान्वितः ।
रक्षत्वसुरनिर्दग्धा सुरपाता त्रयीमयः ॥ १९०

संशीत्यालिङ्गितमुनीन् बहुकाङ्क्षाविमोहितान् ।
विमुक्तान करोद्यो वा स पायाद्दक्षिणश्शुभः ॥ १९१

गाङ्गेयविनुतःपातु गङ्गापति निषेवितः ।
गङ्गादेवी पिता पातु गाङ्गोपो रक्षकस्सुधीः ॥ १९२

परीक्षिदादीन् राजेन्द्रान् राजेन्द्रविनुतः पुरा ।
यो ररक्ष च राजश्रीः राजतात् स्वान्तमन्दिरे ॥ १९३

मुखबाहूरुपादेभ्यः यस्य श्रीवत्सलक्ष्मणः ।
चातुर्वर्ण्यमभूत्पातु स वो नारायणश्शुभः ॥ १९४

वपुर्यस्य महाबाहोः ग्रहा रव्यादयो नव ।
स पातु ग्रहपीडाभ्यः दशान्तर्दशकालयोः ॥ १९५

स्वास्थ्यं च भूषणं धैर्यं प्रागल्भ्यं सन्ततिं धियम् ।
वेदान्तशास्त्रयोगौ च विलासं यच्छतात् श्रियम् ॥ १९६

अङ्गानि शिर आदीनि मेषप्रभृतिराशयः ।
यस्य शास्त्रे निरुक्तानि कालस्स सुखदोऽस्तु नः ॥ १९७

सुभ्रूः सुनासः सुग्रीवः सुस्मिताधरपल्लवः ।
कम्यास्यः पुण्डरीकाक्षः भातु नारायणोऽव्ययः ॥ १९८

माधुर्यञ्च प्रसादञ्च बिभ्रदोजो गुणं पुनः ।
सरसत्वं कवित्वञ्च पातु यो भाति कान्तिभृत् ॥ १९९

वादरूपं समास्थाय नास्तिकत्वास्तिकत्वयोः ।
दैवपूरुषकारप्रीः यश्चास्ति स हि रक्षतु ॥ २००

॥ दण्डकम् ॥

जय जय जय पद्माम्बकसृष्ट कल्हारमाला परिन्यास !
लक्ष्मीस्तनाम्भोजरोलम्ब ! विष्णो !

जय जय जय भक्तेषुविध्वंसितग्रन्थि सन्दर्शितात्मस्वरूपिन् !
परित्याजिताशेषलोकाम्बुजाक्ष !

जय जय जय पद्मासनादित्य देवादि संस्तुत्य · वाणीसमागीत
सामार्थ ! वैकुण्ठवासिन् ! दयालो !

जय जय जय सत्त्वस्तुतिप्रीत ! वेदान्तमन्त्रार्थदायिन् ! त्वया
निर्मितं त्वं गृहाणाशु तूर्णीभवाम्योम् ॥ २०१



श्रीकण्ठमन्दारः

नाम

श्रीकण्ठशतकम्

१ अण्वादिखान्तानि जगन्ति यस्मिन् प्रपेदिरे माश्रमनन्त शक्तौ ।
नेमा शरीरस्य च यस्य चण्डी त्र्यक्षस्स भव्यानि समातनोतु ॥

२ दृग्व्यञ्जना शैलसुता तनौ ते रसावहायां रुचिरा समायात् ।
तस्या अपि ह्लादविशेषदात्री सा व्यञ्जना भिन्नतमा मयीश ! ॥

३ राज्ञां सहस्रादपि शैलपुत्रीं वक्त्रत्विषा पार्श्वगतां विभान्तीं ।
नायाचथाः किञ्चिदपीश भिक्षुः त्वन्मानसं शक्तिमयं विचित्रम् ॥

४ समीक्ष्य मां पापिषु गण्यवृत्तिं दूरं प्रयाया: प्रमथैः समेतः ।
तीर्थाण्यसाराणि हिर क्षणे मे सर्वज्ञ ! गङ्गाधर ! चन्द्रचूड ॥

५ देहात्मनोर्ग्रन्थिरियं हि जय्या भालस्फुरल्लोचनदृष्टिपातैः ।
हे कृत्तिवासः मम कृन्तवृन्ततुरयां जयास्नेह जयाम्बुजाक्ष ॥

६ पीतांशुजालं खलु मध्यभागे पार्श्वेऽरुणांशु ग्रससिस्म वह्निम् ।
कण्ठे लुलुण्ठे न च कुण्ठितोऽभूः लोकावनं कोनु करोति चैतत् ॥

७ श्रीकण्ठ भिक्षाटन भस्मलिप्त लिप्तेषु मुक्तिं ददसे श्रितेभ्यः ।
अनन्यलभ्या अलभो विभूतीः स्निग्धां वहस्यात्मनि राजपुत्रीम् ॥

८ गिरीशपुत्र्याः नलिनेक्षणानि श्रीकण्ठकण्ठे श्रिय आवहन्ति ।
विह्वरहन्ष्टेर्वदनारविन्दात् कटाक्षमाला मदनान्तकाऽस्तु ॥

९ त्वत्कन्धरानर्तितगूढपादः मीतिं प्रकुर्वन्ति च मे न तेऽहो ।
ताः कुण्डलिन्यस्त्वुरुमाकळत्र हे व्योमकेशच्युत तां विभिन्दि ॥

१० लप्स्ये कदा ते करुणामनाथः कथं नु जाने विषयभ्रमोऽहम् ।
श्रीपार्वती प्राणपते महेश मांपापिनं वेद्मि नवेद्मि किञ्चित् ॥

११ राजाननायाः नगराट्सुतायाः पाणिं ग्रहीतुस्तवचेश्वरात्वम् ।
त्वां भिक्षने सापि जगत्समस्तं श्रित्वा त्वयि प्रेम च संव्यनक्ति ॥

१२ तमोरजस्सत्त्वमयेक्षणैस्त्वं ग्रन्थित्रयं मे तनयस्य भिन्धाः ।
समापगो निर्गुणतामवाप्तुं विनायकोऽद्वैत समाधिलीनः ॥

१३ तां तामसीं कालदशं निमील्य त्वं राजसीं प्रेरय हैमवत्याम् ।
सत्त्वोद्भवां दीनशिशौ निधेहि दृङ् मास्तु यद्वा करुणास्तु शम्भो ॥

१४ शैवे वैष्णवतां समीयुषि विभो तद्वैष्णवे शैवता
मेकम्भाति च बादरायणवचः प्रोक्तं नकिञ्चिन्मम ।
शक्तेः शक्तिमतो भिदा न घटते तन्त्रे समुद्घोषितं
ह्यन्वर्थं कुरुषे महद्वच इदं बिभ्रच्चितं स्वात्मनि ॥

१५ धूळिर्जलं स्वच्छतमं पतन्ती करोति यद्वन्मलिनं क्षणेन
सतस्त्वदायत्त विशुद्धचित्त तथैव सङ्कल्पततिश्च मन्ये ॥

१६ बलेन मत्तः कुजनैः परीतः दीनं जनं बाधत एष लोकः ।
स याचते चेद्विवश कदाचित् तिरस्करोतीश दयार्द्रचेतः ॥

१७ अरुधिषत कथञ्चिद्वृत्तय स्त्वत्कटाक्षात्
नियमित मुनिचेतोदृश्य । वेदैकवेद्य ।
पुनरपि भवभावाः पर्यवेष्टन्त शम्भो
पदनिपतितमेनं मुञ्च वा रक्ष वेत्तः ॥

१८ दृष्टिर्निन्दितसुन्दराम्बुजकुला वक्त्रं जितेन्दुश्रि ते
त्वन्मन्दस्मितमाशुबद्धकलहं पुष्पे च कौन्देऽमृते ।
कारुण्यं पुरवैरिणस्तव समाकीर्णं समस्तेषु वै
धर्माधर्मविपर्ययेषु चरतः पाहि प्रभो कर्मसु ॥

१९ नागं हन्त विभिद्य च त्वमविभः कृत्तिं सुगन्धि प्रभो
नागैस्सेवित एव हि प्रमथयुङ् नागाधिपासेवित ।
नागं कोटमुजङ्गमौ निनयिथ ज्योतिर्निषादं पुनः
नागांसि क्षपयां बभूविथ न किं संरक्ष लोकेश्वर ॥

२० श्रीचक्रे भासमान । प्रकृतिनरतनो कालसर्पेण बद्धे
मार्कण्डेये सुराणां परिषदि हहहा निष्ठलायां सुचेतः ।
वैधात्रात् पार्वतीशः त्वमधिकमददाः आयुषो व्योमकेश
आयुर्भक्तावनायप्रकटितमहिमन् नीलकण्ठेन्दुमूर्धन् ॥

२१ कामांश्च तण्डुलगणान् परितो विकीर्य
बन्ध्वादिभिस्सह पतत्रिभिरासमीक्ष्य ।
बध्नाति मां प्रकृति वागुरया ह्यविद्या
बन्धाद्विमोचयतु कारुणिकः किरातः ॥

२२ बुध्या विलोभितं मां कयाचिदखिलज्ञ चेन्द्रजालिन्या ।
कामक्रोधस्तनया मोहजघनया मदयुतयाऽव विभो ॥

२३ यत्र कुत्र विचरामि वसामि त्वत्कटाक्षसहितः परमेश ।
यत्र कुत्र विचरामि वसामि त्वत्कटाक्षरहितः शिशुकस्ते ॥

२४ सर्वस्मिन् काले मे दशासु सर्वासु सर्वविषयेषु ।
त्वत्पादाम्बुजयुग्मं जननीलज्जा दृगञ्चितं स्फुरतु ॥

२५ महादेवं परित्यज्य येऽन्यान् देवानुपासते ।
आम्रं बुभुक्षिताः त्यक्त्वा सेवन्ते बदरीफलम् ॥

२६ नेत्रे निमील्य च तथानु तथा वसन्तं
पुत्रं निरीक्ष्य करुणावशसर्ववृत्तिः ।
प्राक्सञ्चितं विघटयाश्वरविन्दनेत्र
सन्नेष्यते तनुरनन्त कृतेन हि प्राक् ॥

२७ कण्ठे रुद्राक्षमालां वपुषि वरपटो भस्म सन्धार्य सूनुः
वाण्या जिह्वाग्रभागे करतलकमले पद्मया पार्वतीश ।
चित्ते विज्ञानदात्र्या हिमनगभवया पार्श्वतश्चोपविश्य
शम्भो मृत्युञ्जयेश त्रिपुररिपुविनाशिन् चन्द्रचूड ! त्रिनेत्र ॥

२८ गङ्गाधार महेशान शूलिन् त्र्यम्बक शङ्कर ।
कदा स्तोष्यामि सर्वज्ञं पाहि मां पाहिमामिति ॥

२९ नभोभूमिं रोद्धुं निखिलभुवनानि स्थगयितुम् ।
विलीनाः कर्तुं वै पतति जलसङ्घे च ककुभः ।
अवात्सीर्वीरस्त्वं शिथिलितजटाजूटरुचिरः
कपर्देनावध्नाः जय च महदग्रेसरपर ॥

३० पञ्चास्यो गजकामिनीनयनवाः कारी गजामोदकः
नागैर्नित्यमुपासितो भवभयध्वंसः विभुश्शाश्वतः ।
सानन्दं ध्वनिकव्यभिष्टुत महत्तेजोऽशवानच्युतः
भूमा सम्यगलोकितः स्फुरतु मे नेत्रात्पुरो धूर्जटिः ॥

३१ दृष्टिर्निन्दति चञ्चरीकवनिताः संक्षोभमातन्वती
व्यर्थं पद्मकुलेषु कैरवगणेऽधिक्षेप मुद्धिभ्रती ।
वक्त्रं चन्द्रमपाकरोति च गतिः सिंहान् विधिर्यानहो
ते दृष्टिः गमनं मुखं बुधगणैः संस्तूयते काङ्क्ष्यते ॥

३२ त्वं भक्तस्य मनोविशोकमतनोः पूर्वस्य संश्रूयते
तादृग्भक्त दयावशः कथमिवोपेक्षा तनोषीश्वर ।
त्वत्प्रीतिर्ननु कीदृशी कथय मे कर्माणि कुर्वे तथा
यद्वा मुग्धजने कुरुष्व च भवच्चेतोऽनुकूलं विभो ॥

३३ पत्राणि बैल्वानि समीकृतानि धुन्मत्तमन्दारसुमान्यमूनि ।
मन्दाकिनीसिक्त हिमांशुमूर्धन् आयाहि शूलिन् पुरतश्शिवशोमें ॥

३४ यद्वा त्वदिष्टं मे ब्रूहि फलं पुष्पञ्च कर्म वा ।
अवश्यं तद्धि दास्यामि करिष्याम्यघनाशन ॥

३५ अम्बामुखस्य सौन्दर्यं शिरश्चन्द्रेण वर्धयन् ।
पीयूषभानुं पद्मञ्च सलज्जमकरोद्द्रुतम् ॥

३६ निशायामैशान्यं नियमितमरुत्त्यक्त विषयः
प्रसूनैरुन्मत्तै रदितिजहृदं वारिमधुना ।
समासिक्तं लिङ्गं नियमितगुणो निर्गुणममुं
सहस्रारे ध्याता भवति शिव सूनुश्शिवतर ॥

३७ अविकटं विकटं नयनं प्रभोः भवतु मे भवबन्धविनाशकृत् ।
शमयिता मयि तारण वीक्षणं किरतु तापनिवारणमुक्षमम् ॥

३८ अत्रावयोस्साम्यकलाच सम्यक् विचित्रतां चेतसि सङ्कल्पे ।
सर्वोत्तमेषूषिथ चोत्तमत्त्वं बिभर्मि सर्वाधमतामहं हि ॥

३९ सङ्कल्पमात्रेण श्रियं ददासि कल्पैरलभ्यामपि कल्पवृक्षैः ।
अनल्पतल्पाञ्चित तल्पतल्प सन्दोह सन्निग्ध सुपर्वलक्ष्मीम् ॥

४० लोकारसधर्मास्तनयस्त्वधर्मी कथं प्रपञ्चे निवसामि शम्भो ।
त्वत्पादमालम्बनमाश्रितस्सन् आयामि गौरीश भवत्समीपम् ॥

४१ शिवामुखाम्भोरुहमीक्षमाणं गिरिशरक्तं नयनं बभौ यत् ।
तादात्म्यभावेन विवर्तनाध्वनि भेजे मृषानेव विवर्तवादः ॥

४२ ब्रह्मातिदृष्टिर्विष्णवति सृष्टौ व्यापित्वरक्षणद्वन्द्वे ।
श्रयति च चाञ्चल्येते वाणीति कवित्वपाण्डित्यदाने ॥

४३ एकैकशो वा गणतामवाप्य मत्तोऽधिकत्वं न हि याति लोकः ।
दैवैस्समस्तैरपि निन्दितेषु पापेषु नानाविधकर्मजेषु ॥

४४ हिमागमालम्ब्य च दक्षिणस्यां कन्याकुमार्या अपि भारतीयान् ।
सत्कर्ममार्गान् सुजनानुरक्तान् भक्तांश्च शूलिन् शतशो नमामि ॥

४५ चिरन्तनस्त्वं ह्यचिरन्त नाश्रियं चिरं तनोष्यम्बुजलोचनद्वय ।
नगोद्भवालिङ्गित भस्मविग्रह विभोरुचा पाहि शिशु चिरं तनोः ॥

४६ विद्यादयाचिंत श्रीदं सुखं सत्कन्धरं शिवम् ।
विद्यादयाचिंत श्रीदं सुखं सत्कन्धरं शिवम् ॥

४७ ब्रह्माणं मृगरूपधारिण मनौचित्यं चिकीर्षुं रतिम्
शैवं शीर्षलोकिषीति च मृषा धर्मी गदन्तं शिवः ।
प्राक् शिक्षामदिताद्रिजापतिरसौ तेनेऽर्जुनायायुधम्
श्रीमान् चक्षुरक्षयत् प्रददतं कामद्विडास्तां समे ॥

४८ पुष्पेषौ भ्रुकुटिं समाश्रितवति श्रीकालिकायाः मुखे
भस्मीभूतशरीरवत्यपि जयध्यानं च कुर्वत्यपि ।
तामेवात्मनि संविलाप्य विजयी तं चूतबाणं पुरः
सभ्रूभङ्गचमत्कृतिं वितनुषे मन्दस्मितं शङ्कर ॥

४९ कविस्त्वमिति मामुक्त्वा कुतो हासमुखः शिवान् ?
जाने च युवयोश्चित्तं पार्वतीरमणेश्वर ॥

५० शुचयर्काब्जैर्युतं नेत्रैरंशुकव्यासवेष्टितम् ।
शुचयर्काब्जैर्युतं नेत्रैरंशुकव्यासवेष्टितम् ॥

५१ कालस्समायात्र मयेहलब्धः निरुद्ध्य विज्ञानपयोधिजन्मा ।
यद्बुद्धितत्त्वं जननादिहीनं मह्यं समाबोधय शूलधारिन् ॥

५२ त्वत्सूनुरितिमां वक्तुं जायते ह्रीः क्षणे क्षणे ।
क्रौञ्चतारक भेत्ता क ? काहं कुत्र विनायकः ?

५३ तथाप्ययनार्थं सुधियं चरन्तं सूनुत्वभावेन गृहाण पाहि ।
तदा गणेशश्मर सम्भवोपिऽपि करिष्यतो मां मुदितौ विशुद्धम् ॥

५४ मत्तः कोऽनुसुखी ? गणेशशरजौ मन्त्राक्षरैरासने
मां संस्थाप्य हिमाद्रिजेशपुरतः स श्लेक्षतो भ्रातरौ ।

युष्माकं चरणौ निरीक्ष्य शिशुकश्चाहं दयासागर
वृक्षाधस्स्थितिमेत्य हर्षवसतिः स्थास्यामि शम्भो पितः ॥

५५ वयं द्विष्मोऽधर्मं व्युपरमति सर्वज्ञगिरिशे
क्षणं सञ्चिन्त्यायं वदति तनयः क्षाम्य जनक ।
दयालुः कर्तव्यं कलुषितजगच्छान्तिकरणे
भवान् नोवक्तव्यः मम चपलतां त्वं श्रुणु हस ॥

५६ विद्वांसः प्राचीनाः ऋषयः कवयो महात्मानः ।
यस्यां मह्यामासन् तत्रैव वसन्ति पण्डितम्मन्याः ॥

५७ प्रत्यर्थिकुञ्जराणां कुम्भस्स्थलपाटनासिंहाः ।
सद्धद्रोहि भुजङ्गे भक्ताः निद्रां त्यजन्तु धर्मिष्ठाः ॥

५८ कविभिर्मानवजातिः पूर्वं योदोषा शिवप्राप्त्यै ।
सा निद्राति मृगीवत् कविवीरो जृम्भतेतरां क्रूरः ॥

५९ नीचानां सेवायै यतते सत्पण्डितोऽब्रुधा सार्थम् ।
तत्तत्कलाभिवेत्तु श्चित्ते या संस्कृतिर्विनष्टाद्य ॥

६० वीरैरभ्युपगम्या या पौरुषशक्तिरस्ति वै गुण्या ।
एभ्यो नष्टा नृभ्यः हन्ताहं किंकरोमि दीनात्मा !

६१ एतस्यै संस्कृत्यै द्रुह्यन्ति केचिद्धि कल्कवशात् ।
तेषां पुनीहि बुद्धीः सर्वे ते पुत्रकायत्तश्शम्भो ॥

६२ अज्ञानगर्जं छित्वा विज्ञानं देहि मेऽभिलषणीयम् ।
मौक्तिक मिव सन्दीप्रं सुजनैः पूज्यं शिरोधार्यम् ॥

६३ कालिदासादिकवयः कुजनं मामपावयन् ।
प्रभवो भूतभव्यस्य त्वादृशाः नैव लोकगाः ॥

६४ उग्रम्पश्य गिरीश फालविगलत्तद्वीतिहोत्रांशु सं
प्रोद्यद्धूमचयान्धकारित विदिग्बम्भ्रम्यमाणाण्डज ।
दुर्गालोपरिहासवागनुमितान्तर्गूढहास प्रभो ।
शम्भो मच्छिरसीप्सितानि विदधत् पादाम्बुजं स्थापय ॥

६५ त्वत्सङ्कल्पात् कारयित्वा च न स्वं तत्तत्कार्यं कर्तृभावं विश्वसे ।
जाने कर्ता त्वं हि भर्ता च हर्ता भूतप्राणो मानसस्थो वहिष्ठः ॥

६६ सौन्दर्यं मे काव्यतश्चोरयित्वा स्वीये काव्ये स्थापकश्चेत्कदाचित् ।
कारुण्यं त्वं वर्षयित्वा च तस्मिन् शीघ्रं विद्वद्वन्दितं तं कुरुष्व ॥

६७ पीयूषांशोः संस्रवन्तो मयूखाः कालं कण्ठं पाण्डुरं संसृजन्ति ।
कण्ठेकालः कीर्त्यसे यत्र विश्वः मायिन् सृष्टानेकलोकस्त्वमास्से ॥

६८ न दीव्यसे यावदुमेश मानसे स्तुतिश्च तावद्व्यसनं पुरान्तक ।
उपेक्षया त्वं व्यसनी च लक्ष्यसे भवानहं निर्व्यसनावुभौ कदा ?

६९ जरां मृतिं जन्म विपत्तिहेतुं समूलकाषञ्च कषत्पदं ते ।
पतापतोऽहं सुत इन्धमानं श्रयामि रक्ताम्बुजमार्दवताभाक् ॥

७० भक्तस्त्वमिति मामुक्त्वा परीक्षिष्य इतीरयन् ।
दत्त्वां परीक्षां भक्ताय जयसीति वदन् पुनः ॥

७१ संरक्ष्यात्मजमुद्धूत पाप्मानं पार्वतीप्रिय ।
त्वत्पार्श्वसंस्थितेर्दानं लीलैवामोघमायिक ॥

७२ सृष्टिं त्रिधत्ते विदधाति पोषं प्रहन्ति लोकात्त्रयं महेश ।
त्वत्तोऽपरो नास्ति च सेवनीयः ।वधातृविष्वोशमयस्स शक्तिः ॥

७३ तिस्त्रिपुरणाः हन्तुच चक्षुनीतु प्रस्यन्दिविप्रट्सुत पालनाय ।
गौर्या मनः स्रष्टृ च बन्धनाय तवाक्षिचेतो विनिहन्तु पातु ॥

७४ परिचितोऽरिचितो नखदिभ्रमोद्भवरुचा कलया च चितस्तव ।
तव सुतेन च सास्वपता भवे किमिव सम्पतता न कृतं शिव ॥

७५ न संसारे च मोमोघ्नि चञ्चूर्मि विषयात्र हि ।
जाह्वाम्यधीत्र हि स्वान्तं त्वत्पार्श्वे वर्त्तीमि वै ॥

७६ पारेमवं कर्मकृतं च भुञ्जे कर्मान्ततस्ते पदमाश्रयामि ।
बलिष्ठयूना भ्रमितं हि चक्रं वेगान्ततस्तिष्ठति नैवपूर्वम् ॥

७७ दृष्ट्वा च खण्डनं मध्ये भक्तेर्घोरभवे मम ।
पूर्वजन्मसहस्रेण कृतं पापं स्मरामि वै ॥

७८ ऐशानं नखरोचिषां किमपि दिङ्मातङ्ग हस्तोत्कटे
व्यावर्तं सुतदान वार्मलिनितान् पार्श्वांश्च तेजो दधत् ।
मध्ये वह्निविलोचनोत्स निचयैरारुण्यमुद्भावयत्
तत्पार्श्वे नगजादृगुत्पलरुचि प्रोद्दीयतां मत्पुरः ॥

७९ किंपापं न जहासि चेत उडुराट्फालाक्षिरक्तप्रभा
भस्मीभूत सुमेषुरास नचर्किं व्यश्रावि तेऽहोमदः ।
पक्षौ कामरुषौ प्रचार्य किमहो पक्षीव चञ्चूर्यसे
संसेवस्व महेशपादयुगलं कल्प्तासि रुद्रप्रियम् ॥

८० कर्णेभ्यो निष्पतन्तः स्फुटितकचपतद्बिन्दु मुक्तामयूखाः
नेत्रारुण्येन रक्ताः पुनरपि गगनायोत्पतन्तः पिशाचाः ।
घ्नन्तो दक्षस्य गर्वं विकटहसमुखाः क्रुध्यतस्ते शरीरात्
निष्पेतुः शक्तिलेशो ह्ययमिति विषयोऽज्ञायि पाहीशवन्द्य ॥

८१ सयोगमायो न विवेदमूलं स्रष्टा समस्तस्य न वेद शीर्षम् ।
आनन्दभूमत्वमपीह यस्य समेहशोर्गोचरतां प्रपद्यात् ॥

८२ नमांस्यमुकगोत्राय ह्यमुकस्य सुताय ते ।
वैराग्यसोदरायास्तु मुक्तिपत्नी विलासिने ॥

८३ कपिखरहयवक्त्रभूतभाजे पितृपतिसद्मनिवासिने प्रणामः ।
भसितवपुषि पार्वतीयुताय भवरहिताय भवाय भासिताय ॥

८४ साम्भोधराद्रिः धरणिर्विलिख्ये नभस्समस्तं ग्रहतारकायुक् ।
यस्मिन् महेशाय नमस्सुमानि श्रीस्थाणवे लिङ्गशरीरभाजे ॥

८५ श्रीकाङ्क्षिणा गोत्रभिदा प्रयुक्ते वज्रेऽतिरुष्टेन गलेऽपिदग्धे ।
व्यरूपिषातां भवता तितिक्षा श्रीकण्ठ शक्तिश्च शिशुम्पुनीहि ॥

८६ अनिच्छया वा दृढ काङ्क्षया वा परेच्छया प्राङ् निरमायि पाप्मा ।
मत्तो हि पापी भुवनेषु नास्तीत्यनेन मां शिक्षय वह्निनेत्र ॥

८७ भुजङ्गसंवेष्टित शूलधारिन् सर्वज्ञ सम्भावितभक्तसङ्घ ।
नगोद्भवालिङ्गित वामदेह गङ्गाशिरोऽनङ्गजिदास्स्व शान्त्यै ॥

८८ वक्त्रं वीक्ष्य गजाननस्य चलितः व्याघ्रो न गौरीवहः
सर्पान्नैव जिघृक्षुरास गिरिशाऽहिंसा च सिद्धा शिखी ।
त्वत्स्तोत्राणि विधाय पादयुगलं नत्वा च नत्वा पुनः
धृत्वा भस्म तनौ चरामि तनयो रुद्राक्षमालाञ्चितः ॥

८९ मत्कण्ठच्छविभिर्हिमाद्रितनया काली समालक्ष्यते
सौपम्या च कृशा प्रियङ्गुलतया तारुण्यमध्यस्थितिः ।
श्यामेयं परिदृश्यतेऽपि च सिता सुश्यामला कोमला
सारुण्या च कदाचिदस्ति सुनख त्विड्भिः विचित्राकृतिः ॥

९० इत्यादि शतसङ्कल्पैः बद्ध मुक्तिप्रदायक ।
पाहि मां खण्डपरशो गौरीचेतोऽब्जभास्कर ॥

९१ नेत्रश्शाम्भवमस्तु तर्षदमुरुश्रीभाक् शिवालिङ्गितम्
दृष्टं षण्मुखकेशवादि दिविषद्वृन्दै रवियाविभित् ।
नश्यात्तामस मन्धकासुर रिपु प्रोद्यद्विला साक्षितः
सर्वेषामभयङ्करं गजमुखस्कन्दात्मकं निर्मलम् ॥

९२ दीनान् मग्नान् जन्मसंसारमृत्योः पादद्वन्द्वं संश्रितान् पालयाशु ।
लब्धुं नान्यत्कामनुा यच्चलब्ध्वा सच्चिद्रूपं तोषदं देहि शम्भो ॥

९३ वैवाहिके चुम्बति दिग्विभागान् माङ्गल्यनादे दिविपट्टसु राट्सु ।
बालत्वमापे यतिधर्मराजा देयाद्यतित्वं मदनान्तकोमे ॥

९४ कमलाक्षं तारकाक्षं विद्युन्मालिनमासुरम् ।
लोकपीडाकरं शम्भुः योऽच्छिनत् पातु मां शिशुम् ॥

९५ कथङ्कारं समर्थः स्यां कर्तुं शूलिन्नकिञ्चनः ।
द्विहेतु षडधिष्ठानं वाक्यैरित्यादिभिः स्फुटम् ॥

९६ सत्त्वं रजस्तमश्चेति समाश्रित्य पुराणि च ।
पीडाकरान् विचरतः जीवान् शम्भुरलीलयत् ॥

९७ परोपकाराय पुनःपुनश्च मुहुर्मुहुर्जन्म मुहुश्च मेऽस्तु ।
सर्वापदुद्धर्तृतया च शक्त्या चित्यानुकूलो भव कामनायाः ॥

९८ ग्रन्थान् विलोडितुमहो किमु बम्भ्रमीषि? चेतस्त्यजाशु सकलं शिवपादभिन्नम्
मुक्त्वा तरिम्प्रति वितं पंसि तोयराशिं अद्रिं रुरोहसि विमुच्य खयानयन्त्रम्॥

९९ दत्ताचयो परतिरङ्गनयार्धदेह सर्वेषु लोकविषयेषु मुनिश्च्य आत्मन् ।
दोषादिवा जलरुहोदय मीलनेषु मे स्याद्दधीच रिपुपक्षहरिस्तुतीर्भाक् ॥

१०० पुरारिनाशाय रवीन्दुबिम्बे सम्प्रस्थितस्याभवतां रथाङ्गे ।
आत्मस्वरूपस्य निरञ्जनस्य लोकस्समस्तश्चरणानुषङ्गी ॥

१०१ नमः श्रीकण्ठाय त्रिपुररिपुनाशाय महते
नमः श्रीकण्ठाय प्रणतविपदुन्मूलन बुधे ।
नमः श्रीकण्ठाय प्रणतनवखेटाय पटवे
नमः श्रीकण्ठाय प्रमथपतये स्तेन पतये ॥

१०२ नमः प्रथमवैद्याय नमस्ताम्रारुणाय च
मुष्णताम्पतये खड्गवते नक्तञ्चराय च ॥

१०३ नमस्सहस्राक्षसहस्रपाद दशाङ्गुलाक्रान्तभुवे नमस्ते ।
आदित्यवर्णाय पराय पुंसे स्थिताय भूम्ने तमसः परस्तात् ॥

१०४ धृतगङ्गः कृतभङ्गः जितसङ्गो राजताज्जितानङ्गः ।
भृतडमरुः नटराजः नटताद्गिरिसीम्नि मङ्गलश्रीकः ॥

१०५ वित्तञ्चमे भविष्यच्चमे यशश्श्रेयश्च मे ऋतम् ।
वृद्धिश्चमे च सत्यञ्च सन्तु चक्षुश्चमे बलम् ॥

१०६ श्रीकण्ठ श्रीकण्ठ लताः स्फुटाब्जाः श्रीकण्ठ श्रीकण्ठ जितः कुमुद्वान् ।
श्रीकण्ठ श्रीकण्ठ समेति भास्वान् श्रीकण्ठ श्रीकण्ठ जहीहि शय्याम् ॥

१०७ श्रीकण्ठ श्रीकण्ठ हिरण्यबाहो श्रीकण्ठ श्रीकण्ठ विरक्तलोक ।
श्रीकण्ठ श्रीकण्ठ रमेशरूप श्रीकण्ठ श्रीकण्ठ सत्स्य धन्विन् ॥

१०८ श्रीकण्ठ श्रीकण्ठ नमांसि तुभ्यं श्रीकण्ठ श्रीकण्ठ बधान शत्रून् ।
श्रीकण्ठ श्रीकण्ठ समुत्थितः स्याः श्रीकण्ठ श्रीकण्ठ विदेहि सौख्यम् ॥

१ इत्थं गिराशो हृदि भासमानः सच्चित्स्वरूपः स्फुरदात्मदीप्तिः ।
व्यलेखयन्मन्दधिया स्वयम्भूः संसारगर्ते पशुनामथासः ॥

२ नुतिर्देवेनचाकारि मयाल्पमतिना नहि ।
प्राप्य तस्मिन् लयं शीघ्रं बोभवीतु सुखप्रदा ॥

३ सुब्रह्मण्यः कविर्भाति निष्ठलान्वयसम्भवः ।
सन्यासिशर्मणः पुत्रः श्रीकण्ठशतकं व्यधात् ॥

श्रीशक्तिनुतिः

१ श्रीकृष्णः कालरूपः नियमितनियतिः शान्तिमग्नोययाऽभूत्
या मूलं नः क्रियणां सकल श्रुतिगिरो बोधयन्ति स्फुटं याम् ।
बुद्धिं या प्रेरयित्री स्फुरतु हि सुखदा ध्वंसतां तापशत्रुं
सा शक्तिः कालभिन्ना शमदम जनितं शम्प्रदेयान्निरीहा ॥

२ श्रीहरिं सर्वदा सेवमानां मुदा चारुहस्तां सुनेत्रीं तमश्छेदिनीम् ।
सर्वसौभाग्यदां सर्वदुःखापहां ज्ञानरश्मिप्रदां तां भजे भार्गवीम् ।

३ नागैर्वृता परिमलाढ्य जलेन सिक्ता वैडूर्यनीलमणि गुम्फितविष्टरस्था ।
या देवता सकलवैभव सिद्धिदात्री लक्ष्मीं सदा सुमनसा प्रभजे च देवीम्

४ दारिद्र्यतापविनिवारणशक्तिराजे त्वन्नामकीर्तनमहं सततं करोमि ।
पद्मालयेऽव विनतं तव पुत्रकं मां सन्तापवारणचणेन विलोकनेन ॥

५ हे शौर्यलक्ष्मि नवनीरजराजियुक्ते मानेनभासुरमिमं कुरु मां सदा त्वम्।
कालाख्यचक्रचलने प्रविलीन चित्ते क्षौमाम्बराणि दधती परिभासमाने।

६ वीराणां हृदि राजन्तीं समरोत्साहरूपिणीम् ।
भीतिं प्रकुर्वतीं शत्रोः ध्याये शक्ति मनन्यधीः ॥

७ इन्द्रनीलमणिविष्टरस्थितां योगिहृत्कुसुमसेवितां रमाम् ।
पापनाशनपटुत्वप्रसारिणीं भावयामि हृदि लोकमातरम् ॥

८ दष्टोऽहं विषमेन कामफणिना हे मे विषं नाशय
मच्चित्तस्थित मोहबन्धमखिलं विच्छेदय त्वं द्रुतम् ।
शत्रून् मारय तत्त्ववह्निशिखिया क्रोधादिरूपान् बहून्
वन्दे मङ्गलदेवतां मनसि मे त्वामेव नान्यं सदा ॥

९ श्रीचक्रस्थितबिन्दुमिन्दुवदनां व्यासाङ्गणैर्योगिनां
कामक्रोधविनाशने पटुतरां ऋग्भिस्सदा कीर्तिताम् ।
योगाभ्यास वितग्र निर्मलमनः पङ्केरुहे ल्लासिनीम्
अक्षं गह्वर कालचक्रचलने तामिन्दिरां भावये ॥

१० वन्देऽहं तां महालक्ष्मीं वैडूर्यमणिदायिनीम् ।
तस्या अनुग्रहेणैव कस्य सम्पन्ननुर्ननु ॥

११ श्रिरं लक्ष्मीं वन्दे शमदम तितिक्षादि सुगुणान्
नतस्त्वत्पादं कः नहि भवति मुक्तः परमुखी ।
जडस्त्वं भो लक्ष्मि क्षपय मम बुद्धौ विनिहितम्
प्रदेहि त्वं विष्णोः परमसुखदं निर्मलयथीम् ॥

१२ संसारार्णव तारणैकतरणिं पद्मं हसन्तीं मुदा
सेवे लोहितपद्मवारि ललनां शक्त्या तमोभेदिनीम् ।
लक्ष्मीं तां गुरुकेशपाशसहितां मन्दस्मितं कुर्वतीं
कालज्ञां भवारणध्वजयुतां सिद्धिं भृगोर्दायिनीम् ॥

१३ प्रसरतु वदनात्ते सर्वसम्पत्प्रदा दृक् निपततु रिपुसङ्क्षोभमातन्वती दृक् ।
स्थितिजनि विलयांस्तान् कुर्वतोलोकमातुः जलधिजनितायाः
दृग्विशेषान् भजेऽहम् ॥

१४ कन्दर्पस्थस्य दर्पस्य नाशात्सिद्धिः प्रजायते ।
कपर्दिनस्सिद्धिरिव परमानन्ददायिनः ॥

१५ सर्वभूत भीतिभाव भञ्जिनीं नमामि माम्
भक्तलोकपालिनीं मनः प्रवृत्तिभेदिनीम् ।
चारुरत्नयुक्त हारधारिणीं नियन्त्रिणीम्
सर्वमन्त्र मूलशक्तिरूपिणीं विरागिणीम् ॥

१६ विभास्वती मङ्गल दायिनी पदे सुसंस्थितैः कोमलचारुचारिजैः ।
विरुध्यमाने खलु लभ्यते नते जनेन लोके हि नतेनतेनते ॥

१७ मां तारय महालक्ष्मि मग्नं संसारवारिधौ
नावं मे देहि संसार सागरोद्धरणदृढाम् ॥

१८ तस्याः समीपे विकसन्ति तानि, सद्भक्तनेत्राणि विनिर्मलानि ।
विज्ञायते लोकविरुद्ध वृत्तं रात्रेः पतिः पद्मविकासकारी ॥

१९ मनोरमा रमामारं जेतुं शक्तिप्रदायिनी ।
सा षड्वर्गं जगद्भावहन्त्री मुक्तिप्रदायिनी ॥

२० सर्वामया मयादेव्या नश्यन्ते ते दयामयी ।
योग्याश्रयाऽवपायासा जगन्मायाप्रणाशिनी ॥

२१ अज्ञानबुद्धेर्हि सुशीघ्रमुध्यन् मुक्तायदाश्रित्य नवग्रहा वै ॥
इन्द्रादिदेवैरपि पूजितन्तत् पद्माङ्घ्रिपद्मं मुनिसद्म वेद्मि ॥

२२ क्रोधेन रक्तवदनाच्छतीक्ष्णदृष्टिः श्रीलक्ष्मि सा ददतु मङ्गलदायिनीमाम् ।
कामादिशत्रुगिरिभञ्जनमेव यस्मात् तत्क्रोधवीक्षणमनन्तसुखस्य दातृ ॥

२३ हे ललितपदवितितियुतां देहि मधुररसविकिरिणीम् ।
मे सकल भुवनजननि मेऽलङ्करणयुजमिह कवितााम् ॥

२४ नह्यन्यं प्रभजामि नीचभुवने वेदान्तमाया विना
यादेवी हिमदीधितेः स्वरुचिभिः मानस्यहानिं ददौ ।
प्रध्यैत्रे प्रददाति सा भगवती चित्तस्थकाङ्क्षां नु मां
सर्वज्ञां वरदां श्रयन्तु विबुधाः तस्यै खलप्यै नमः ॥

२५ साहित्यस्य विलोडनाज्जलनिधेर्जातं न बोधामृतम्
अष्टैश्वर्यसमन्विते नृपमहाभोगेपि काङ्क्षा न मे ।
मायाकल्पित मोहरूपजगतः स्फूर्तिं समूलं क्षप
त्वं लोकस्य हिताय सर्ववरदा भूया मुरारिप्रिये ॥

२६ त्यक्त्वानीचनुतिं लसन्तु मनुनाऽसप्पौरुषेणोत्तमाः
स्पर्धा तिष्ठतु सद्गुणेषु नितरा मानन्दनिष्यन्दिषु ।
वर्तन्तां विमले च वर्त्मनि जना वेदान्तरूपे सदा
श्रीमायाः कृपया भवन्तु सुधियां वेदान्तधीरश्मयः ॥

२७ श्रीहर्षमाघादिमहाकवीं स्तान् प्रणम्य भक्त्या क्रियते मयेयम् ।
लक्ष्मीपदाम्भोरुहचिन्तकेन तस्याः कटाक्षं प्रभजन्तु मर्त्याः ॥

२८ या नीलालकललना नवजलदनील विष्टरस्था या ।
सा नो रक्ष्यात् कृपया चैन्द्रीग्लौतुल्यवदना या ॥

२९ कवितेयं मम सविता कुकविरव तमोविभेदने लोके ।
वाणीकटाक्षयुक्ता सज्जनहृत्तोषदा जं यात् ॥

३० ते चरणकमलकिरणो दर्शयतु कवित्वसोम सुखदात्रि ।
संसार वह्नितप्तं नम्रं ते पुत्रकं पाहि ॥

३१ त्वद्गात्रविशदकान्त्या ह्यपिधीयत नीलशुक्लरुग्राजिः ।
माया ज्ञानविकासे निलीयते ब्रह्मणि यथाऽम्ब ॥

३२ वीणायुक्ता वाणी राज्ञी याने हि सर्वविद्यानाम् ।
या नीहारश्वेता सैणीजितनेत्रयुग्माऽव्यात् ॥

३३ आत्मा यस्याश्चहेळिः हिमकिरणकुजा चित्तसत्त्वे बुधोवाक्
ज्ञानं सौख्यं च दुःखं गुरुसितशनयो प्राप्नुवन्ति क्रमेण ।
यस्याः सीमन्तकान्ति दिनकरतुरगा मेनिरे हेळिदीप्तिम्
पायात्सूर्यं हसन्तो स्वहयमुखरवा दागतं भ्रान्तचित्तम् ॥

३४ अयि भगवति मातस्सर्वभूतान्तरस्थे सरसिजहस्ते पाहि दृष्ट्या लहर्या ।
प्रणतकरसुतं मां तत्त्वविद्याप्रदात्र्या कलुषितहृदयं भो मूर्खपुत्रं पुनीहि ॥

३५ नेत्रे सद्योविकसितसुमे दाडिमे क्रोधकाले
सीमन्तस्थो घृणियुतमणिः सूर्यगर्वापहारी ।
नेत्र्या वाचां ह्यधरकिरणा बन्धुजीवावरेजुः
तस्मात्तत्र स्थितमुनिगणो ग्रीष्मशोभां वमेने ॥

३६ केशान् भृङ्गा नरुणवदनं तोयजं नेत्ररम्यम् ।
वीणानादं मधुकररुतं कोकिलालापमुक्तिम् ।
मत्वा मुग्धा इति च मुनयो देवतां ब्रह्मपत्नी
चित्तेऽकुर्वन् श्रुतिपटुतमास्ते वसन्तो वसन्तम् ॥

३७ सिद्धाःकान्ताः दीर्घकेशाश्च वाण्याः चक्रुः पूजां मल्लिकाभिश्च याभिः ।
नून विद्युद्युक्तमेघप्रयुक्ताः प्रावृट्काले बिन्दवस्ताव रेजुः ॥

३८ नैर्मल्यं शरदि यथा सरोवराणां भक्तानामपि हृदयानि तानि रेजुः ।
रुग्लावो कुमुदविकासकारिणीव दृग्वाण्या पतति हि भक्तनेत्रसङ्के ॥

३९ जगन्मिथ्यां बुद्धिं प्रजनयति वृत्तिर्हि मनसः
अतद्छित्वा वृत्तिं धरणिधरभूतेषु नु सदा ।
निमग्नस्सत्त्वैयो वसति भुवि मैत्र्यादिलसितः
परं ब्रह्मावय सः निखिलदुरितेभ्यः मुनिवरः ॥

४० न जानेऽन्यद्गौर्याः पदकमल भक्तेर्हि भुवने
अतिक्रूरैर्मर्त्यैः कलुषितमनोभिः परिवृते ।
अहं धर्माधर्मौ सुखसुखविनाशौ न विदितः
पदन्ते श्रेयो मे प्रतिदिशतु महाकाळि गिरिजे ॥

४१ भवानि जगतो भवानि विगतोऽद्य मोहादहम्
विदेहि चरणे विधेहि करुणे जयं शत्रुषु ।
चिदात्मसुकलां विधास्यसि कदा विद्रो मे मुदा
क्षणेन तव वीक्षणेन परमं सुखं देहि भोः ॥

४२ नेत्रगात्रे दयामय्याः मन्देन्दीवरचन्दने ।
रुद्राणी दग्ध कामोऽहं वत्स्यामि च कदा मुदा ॥

४३ रिपौ गुरुर्नक्रगृहे च यस्तनुः अलभ्यवस्था परपुष्टजेन सा ।
व्ययस्थशुक्रस्य धनस्थशीतगोः दशान्वकरीह पिकेन सर्वदे ॥

४४ श्रीनेमनादिमुनिवाक्षु सुधासमानं माघादिदिव्यकविभिश्च निरूपितंयत् ।
राणप्रतापहृदये च विराजमानं तच्चण्डिके तव सुतस्य सुखं प्रदेहि ॥

४५ कलौ न दृष्टा कुजनैर्विशिष्टता समस्त साहित्यसुधा कृता विषम् ।
तमोगुणस्थैः कवितावितालोलुभैः पदाधिरूढैर्विदुषां नगात्मजे ॥

४६ दक्षे दक्षसुते क्षमाविलसिते न्यङ्क्षस्य रक्षाप्रदे
यक्षैश्चापि विचक्षणे परिवृजे फालाक्षनिक्षिप्तदृक् ।
दृग्दृश्यादिविलक्षणे क्षपमनस्सद्योगिभिर्लक्षिते
पापक्षाळिनि देहि मोक्ष मिहमे पद्माक्षि सुक्षान्तिदे ॥

४७ प्रभातसमये सहस्रछदनैः प्रभवितततिभिः विराजितसुमे ।
प्रभावसुगुणे स्फुरत्वममले प्रभावितगुणे सुतस्य गिरिजे ॥

४८ विकसत्पुष्पलसत्कचे कुचतटे रत्नैर्युतं दाम ते
प्रलये भानुशतश्रियं गिरिवरं क्रोधे बिभर्त्यंघमे ।
करुणे चन्द्रसमानकान्तिवदने कुन्दावलेश्चण्डिके
किरणाः पार्वति सन्तु मोहतमसो विध्वंसिनो मुक्तिदाः ॥

४९ बद्धे कामविशृङ्खलैस्तवसुते लोभादिशत्रुस्थिते
आर्ये दारसुतादि मोहमदिरामत्ते महाकाळिके । '
मात्सर्यादिकुकण्टकैः परिवृते मार्गेस्थिते ने दृशम्
ग्रस्ते क्रोधनिशाचरेण मयि भो विक्षेपय श्रीयुताम् ॥

५० पुनातु शारदा विशारदा शरद्वतौ सरस्सुमस्य बाधकारिणी च या
विभातु मे दयामयी भयापहारिणी वशीकृताश्शशी मुखश्रिया यया ।
परा त्रिवेदरूपिणी निरूपिता महात्मभिर्हि विश्वरूपधारिणी
सहस्र नेत्र पादरामणीयक श्रियायुता चिदेव मुक्तिमार्गदायिनी ॥

५१ सर्वे लोकास्त्वद्गात्रस्था भानुश्चन्द्रो भूजो राहुः ।
जीवो मन्दश्शुक्रः केतुः मातर्विश्वं सर्वं त्वं ज्ञः ॥

५२ सर्वाक्षराणि त्वद्गात्रमयानि भान्ति लक्ष्मीस्त्वमेव गिरिजे रमणी विरिञ्चेः ।
त्वन्नामसंस्मरणमग्नधियश्च मातः वासो ममास्तु भुवने भवने वने वा ॥

५३ यो आर्ये भवदङ्घ्रिपद्मरजसः तस्या रजोरूपया
ये कुष्यन्ति भवन्ति ते विकलयाज्ञप्त्या जननीनान्ततौ ।
मन्येऽधर्मपशुं चतुश्श्रुतिकरैर्हत्वा फलं धर्मजम्
ज्ञानाग्नौ ददतीं स तां नगसुतां कालस्वरूपामहम् ॥

५४ मीनं ते नयनेन तुल्यममरत् केतो हि सम्पूजितः
विद्वद्भिर्ननु मीनकेतुरभवत् दृश्योऽप्यदृश्योऽपि वा ।
अर्णोबुद्बुदवज्जगन्ति नयनस्पन्देन निर्मास्युमे
शक्तिर्योगिगणैर्निरस्त विषयैः जेतुं न शक्या बभौ ॥

५५ त्वदाज्ञायन्त्रिताद्देवाः विधिविष्ण्वीश शङ्कराः ।
स्वे एवे कर्मणि वर्तन्ते अतस्त्वं मूलकारणम् ॥

५६ चन्द्रोऽत्रपिष्ट मुखपद्म पराजितश्रीः तत्रास वारिणि झषो नयनं निरीक्ष्य ।
इन्दीवराणि जगदम्ब दृशोविमम्लुः आकर्ण्य वाच ममृतां हि पिकी ललाप॥

५७ विदस्यमैत्र्या स विराजिते ग्लौः जीवोरिपुस्थोऽपि भयाद्विमुक्तः ।
मन्दोऽपि ते निर्मलवीक्षणेन मृत्युभ्याश्रितोऽप्यधिकं चकास्ति ॥

५८ कज्जलजा बलजन्तकतीह तामसदृक्तव कालि शवस्थे ।
मुण्डितमस्तककधारिणि कामे घूर्णयदेवि दृशं ममशत्रौ ॥

५९ सर्वहितं कुरु राजसदृष्ट्या रक्तरुचा नयनस्य भुवश्शम् ।
कालि सुरासुर पूजितपादे धूनय धूनय षड्रिपुसङ्घम् ॥

६० जननि जगन्मम वशतां भजतां सुरगणकाङ्क्षित सुखदे गिरिजे ।
इनशशिनेत्र विलसिते कुरुभोः तव पदचिन्तनसुधियां प्रभुताम् ॥

६१ चन्द्रसमाने सत्त्वमयित्वं शीतलदृष्ट्या निर्मलवीच्या ।
पावय लोकं शान्तिनिमग्ने वेदविविज्ञे राजितकण्ठे ॥

६२ भुवनविलोकिनि निशिते निशिते जननि जपे स्थितमरुणे वगळे ।
परम विहारिणि विजये निजया शमसहितं कुरु करुणासुदृशा ॥

६३ क्लीवाना मिह पुरुषत्वसिद्धिदात्री सौभाग्यं हरिणदृशां ददाति या चिन् ।
सा गौरी शिवनयने विनिक्षिपन्ती स्वां दृष्टिं स्मितवदना भुवं वितेज्यात्॥

६४ श्वानस्सुवर्णमय विष्टर संस्थितास्ते निन्दन्ति केचिदिहनागरिपूंश्च सिंहान्
जल्पन्ति सिंहसदृशा वयमेव नान्ये सिंहा निमीलितदृशः किमिदं महेशि॥

६५ कालिके रुचिं जहार नेत्रं रक्त पद्मजां शिवे दिनान्ते ।
सौख्यदायिना रविस्वरूपे गौरितेजसा भुवश्च तेज्याः ॥

६६ सुदीर्घिकाविलसिता समम्बसा नवकुन्दसूनरचिताः शिरोरुहाः ।
खलचित्तभीति जनका पुनातु निटं अवताद्धि कालपुरुषस्य माङ्कुशा ॥

६७ स्वभर्तृकर्त्रोः गुरुयोगयुक्तयोः दशाश्चयान्दातु मिहास्ति मे कुरु ।
नभस्स्थ राहोर्दशया विराजितं देवीकटाक्षो विदधातु मां भुवि ॥

६८ उपवन तरुमाश्रयेऽहंमुदा सकलश्रुतिपुराण शालायुतम् ।
अपनयतु हि वारिजं वारिजं भयमगतनयासुखं निर्मलम् ॥

९ मधुकरकुलशोभितनीरजा तुदतु च सुगुणामति नीरजा ।
मुनिवरवरदा भुवि नीरजा कुवलयनयना जननीरजा ॥

० वदनहिमांशुः विशदकरैस्स्वैः मधुकरसङ्घान् शुचिरुचिमग्नान् ।
विरचितवान् हा किसलय शेषं जनमति लोकं कुमुदमुदव्यात् ॥

१ अदृष्ट्वा ते नेत्रे शोभयानौ समानावभूतां जल्पन्तौ पद्ममत्स्यौ विमूढौ ।
कष्टैः शनैः यद्वन्नास्तिकश्चास्तिकश्च यतत्त्वज्ञौमूढौ सज्जनं बाधमानौ ॥

२ इहरवौ तरुणैः किरणैर्युते समनिमीलित पद्मविनिर्गताः ।
मधुकरा इव रोषमुपागते तवमुखे तरलाः सुदृशो दृशः ॥

३ अद्रम्मेऽदभ्रं विभ्रमभ्रूयुतेभोः भङ्गे त्वं सिक्ते रक्तजालैः प्रदेहि ।
रुद्रो भीत्या त्वां तुलोके शवस्थां नेत्रज्वाला तेऽधर्मशत्रुं निहन्यात् ॥

४ विजृम्भतां राजसशक्तिरद्य ते धर्मादधर्मादपिभिन्नरूपिणि ।
रामाजनैस्सेवितपादपङ्कजे रत्नैर्महद्भिस्सहिते हितेऽव माम् ॥

५ द्वेषोहि यस्यास्ति नगस्य पुत्रि प्राप्नोति शान्तिं न कदापि मूर्खः ।
भूतेष्वनेकेषु सदादयाश्च प्रदर्शितुं देहि मनः पवित्रम् ॥

६ भो स्मरस्मरहि विस्मितमनसि रक्षितोऽस्मि जगतिस्मितकिरणात् ।
पूर्वदिग्जनित चन्द्रविशेषात् रम्यलास्यगिरिजामुखचलितात् ॥

७ यद्यस्तिवित्तं कुजनस्य गौरि स एव विद्वानपि धर्ममूर्तिः ।
गुणेन युक्तोऽपि बहुश्रुतोऽपि प्राप्नोति निन्दां हि दरिद्रतातः ॥

८ भुजगजलजफेनैर्भासमानं भ्रुकुटिनयनहासोद्भासि वक्त्रम् ।
जगतिच गतिरेका रक्षतान्नः सरइव बहुवीची आवरम्यम् ॥

७९ परशिवे ममता ममतापदा जननिते विनुते हर तां दृशा ।
कवितया हितया जनरञ्जने सुपटुता मिहदेहि. नगात्मजे ॥

८० न ममता हि मता नळिनाळिना तवदृशी गिरिजे विपदां क्षुषः ।
कुवलयैस्सहितं पतितैर्नभः तव समञ्जठरं हरवीक्षितम् ॥

८१ सङ्कल्पसिद्धिं गिरिजाकटाक्षा दीप्सुश्च मन्त्रेषु विचक्षणत्वम् ।
महादृशायां हि सितस्य बभ्रोरन्तर्दशायां रचिता मयेयम् ॥

८२ रिपुगणं कुपिते नगराट्सुते जलधराश्चलिता ननु तारकाः ।
रविविधूचलितौ चलितं नभः त्वमुपसंहरकोपमिहाथ ॥

८३ गात्रं कज्जलकान्ति पार्वतिविभोर्दन्तपुण्डरीकैर्युतम्
मुक्तासङ्ग्रथितेन्द्रनीलमणि भूर्वभ्राजते ते ध्रुवम् ।
फालस्तेकरुणादृशो प्रतिदिनं रात्र्यायुतं घूम्यया
यागं तत्र भुवः करोति च ध्रुवं भद्रदृशये शिवे ॥

८४ यद्व्यङ्ग्यप्रतिपादितं जलनिधिप्रोद्भूतचन्द्रेशिशके
तद्व्यङ्ग्यस्फुरणाय चित्ररचना युक्ता पदानांततिः ।
नित्यव्यङ्ग्यतया स्थितं रससुखं ज्ञातुं विना शक्नुयात्
ऊनं ब्रह्मसुखाद्धि सज्जनहृदां श्रद्धेऽत्र वेदान्तिनः ॥

८५ न साम्यमाप्तुं हि शशाङ्क चम्पकं न सा शिवप्रीतिजया जयश्रिया ।
न बाह्यसौन्दर्य मपेक्षते सतां मनः प्रभावं बहुमन्यते यतः ॥

८६ पयोनिनैस्संस्कृतवाङ्मयस्य घटोद्भवं मां ललना करोतु ।
मृणालनाळकृतराजहंस्याः लज्जां ददौ या भवहस्तलग्ना ॥

८७ वाच्या स्पृष्टस्य भावस्य स्फूर्तिर्यस्यास्ति सुन्दरी ।
सतामाह्लाददा काळि भेदस्तस्या न ते क्वचित् ॥

८८ दाक्षायणीकरुणया लसितो जनोऽहं मन्त्रञ्जपन् नियतः निशिभद्रकाख्याः
हस्ते विभाति मम मन्त्रविशारदत्वं वत्स्यामि हन्त कविताविततौ ततो भोः

८९ श्लोक प्रवाहजनितां रमणीयभावां मातस्तवारुणपदाय पयोजमालाम् ।
शीघ्रं गृहाण मम विष्णुपद प्रदेहि पापञ्चिकेषु विषयेषु नमेऽस्तिकाङ्क्षाम् ॥

९० चित्तानि रञ्जयतुमे कवितासतां ये भूमौ वसन्ति सुजनाः खनयो मणीनाम्
तेभ्यः प्रपञ्चहितकामनयावसज्यः कुर्वे नमांसि गिरिजाचरणाधिवासः ॥

९१ अग्निर्वभाति लोको मे तापानां कारणं यतः ।
कामानाशृङ्खलाबद्धं तर्हि मुक्तं करोष्युमे ॥

९२ सित्कारक्तैः गगनसदृशी मांसखण्डै र्वृता या
रौद्र्यां भूम्यां विहरति सदा मालया मस्तकानाम् ।
क्रुद्धा शत्रून् प्रति शवगणे रावृता तामसश्रीः
पायात्काली रिपुजभयनुन्मा शिवा विश्वमाता ॥

९३ चलत्कङ्कण द्वन्द्वसञ्जातरम्य ध्वनि श्शत्रुचित्तानि भिद्याज्जयायाः ।
सतां हृत्सुमोद्भपदो योगिभिः पूजितस्सर्वदा काळि लोकम्पिपर्तु ॥

९४ मन्दारवृन्दपरिसेवितसुन्दराङ्गी मन्दाकिनीव दरहासरुचा विभान्ती ।
अम्बा परिस्फुरतु चक्रणितम्बबिम्बा बिम्बाधरा सितसुमग्रथितालकासा ॥

९५ वयोनीतं कालो भ्रमति रभसात् पार्वति हिमां
रिपूणां त्वन्नामस्मरणसहितं नेच्छति गणः ।
कदा काश्यां पाश्यां वसति तव छित्वा कुतनयः
चितो विद्यास्थानी त्रिगुणरहितः काळि कुशली ॥

९६ नगकुलपतिपुत्री बुद्धिसाक्षित्वमाप्त्री सकलभुवनधात्रीचेतना सृष्टिकर्त्री ।
मुररिपुपदनेत्री दुष्टभावप्रहन्त्री कुवलयदळनेत्री पातु मा तत्त्ववेत्त्री ॥

९७ दाक्षायणीनखमरीचिगणो हिमांशून् भव्यः सृजन् वियति विभ्रमतां चकल्पे
शान्त्यै हि कालपुरुषस्सितपुष्पसङ्घैः नूनं भुवामपचितिं विदधाति देव्याः॥

९८ अचञ्चला राजतचञ्चलाश्रीः लोकं पृणाया नयने जनन्याः ।
इन्दीवराणां हि दळेषु लक्ष्मीः ननर्त रेजुर्ननु मल्लिकाभिः ॥

९९ सर्वस्या राज्यलक्ष्म्या क्षयमपि मुमुदे विष्णुभक्तो बलिस्सः
कर्णौ गन्धर्वराजश्शिबिरिति मुनयस्तत्यजू रक्षणार्थे ।
तेषां मातस्सुकीर्तिं दधुरिह विमलाः स्वात्मभावस्थिता ये
पन्थाः श्रेयः प्रदोमे भवतु नगसुते ते दृशामुक्तिदात्र्या ॥

१०० आवेल्लाभ्रुकुटिरुचिर्जगन्ति पातु शत्रूणां कुटिलधियां भुजङ्ग एव ।
पस्पर्धे हरपदकुङ्कुमेन युक्ता काळिन्दीपयसि सुरक्तपद्मकान्त्या ॥

१०१ मुज विजयासहिते शिवे सुतं रिपुजनवादपटुत्वराजिते ।
बबदयदा नहि मीनकेतनो मनसि ममाप्य पदन्ददातु शम् ॥

१०२ एजाञ्चक्रे नयनयुगं रुद्राण्याः फालाक्षस्य प्रणयसमाधेर्दंष्ट्या ।
भर्तूरागे जनयति वा निर्वेद वेदद्रष्ट्र्या सृजतु भुवं तद्वीर्याः ॥

१०३ भर्ग गतपार्श्वे व्यर्थं कथयन्ति देवीनयनं तं दृष्टिर्निबबन्ध ।
मातुर्मणिमाला कण्ठे विजयट्टे रक्ष्यात्सुरराजश्रीमुंड्धनुषस्सा ॥

१०४ क्रुद्धायाः नेत्रवह्नेः कणइव तपनो सिन्धुमध्ये पपात
यस्या दृग्धूमसङ्घैर्जलधर सदृशैश्शीतगुर्ग्लानिमाप ।
दृष्ट्वा भीमां शिवांयां नयनजविमुखो रात्रिकान्ता मुमोच
नून तास्तारकाः खे वसुरिव जगतां भीषयितो पुनातु ॥

१०५ निशाश्रिता पद्मनिराजमाना सदासुमन्थ पिनद्दष्टियुक्ता ।
गिरिश्रिता शुभ्रमरीचिदेहा कात्यायनी पातु भुवं स्वदृष्ट्या ।

१०६ जनतया नतयानतयानुता मदलवोपिभृतो गुणयुक्तया ।
करुणयाऽरुणया ऋणयातनं तव पदस्य रुचाक्षपते शिशोः ॥

१०७ कस्यास्तिमातृवदनस्य वर्णितुं शक्तिर्ह्यनन्तगुणसंयुतां श्रियम् ।
मुक्तं करोतु ललिता जपस्थितं मां कामिनं तुजतु नादरूपिणी ॥

१०८ यम्भावयन्तिमुनयः पदंरवं नद्यो गिनाममृतसिद्धिंद विदाम् ।
तन्मूलशक्तिरिहलोकपावनी मां योगिनं सुविमला करोतु सा ॥

१०९ अमृतं ददातु कुलजा गिरिजा नखकान्तिजात मुरवैरिततिः ।
दशमे हिमांशु सद्मने हि गुरुः भृगुजोझषे हि कुरु यस्यहृदशाम् ॥

११० न हि यमान्ममविभाति गौरि भीः तवपदाश्रितजनस्य कुत्र सा ।
घृणिचयोजननि ते बभौ दतां विशदकुन्द गणशोभया शिवे ।

१११ पुत्रंत्वं सर्वतन्त्रे चिच्चन्द्रलेखे पराश्रीरुग्युक्ते कर्तुमीहे सिद्धिं कवित्वस्य
मातः ।
स्तोतुं त्वां नास्ति शक्तिमूंडंसुतंपावय फालाक्षस्योष्ठबिम्बं त्वां
कःपयतीं प्रसेवे ॥

११२ क्रन्दतीभिश्शिवाभिः पललशकलजा वाहिनी शोणितस्य
पीता यत्र श्मशाने जलधरपटवैस्स्थीयते धूमसङ्घैः ।
क्षुद्राणां देवतानामिह जगतिफलं लब्धुकामैः कृपाभिः
शुकः खान्तं दिदृक्षुर्वं चलतिसहिता कालिका पातु मान्ती ॥

११३ खलिनीं मलिनीं कुरु मे नगजे स्वकरे दशचक्र धरे वरदे ।
अरुणा धरजैर्भवनेत्रयुगं किरणैः स्फुटितं जगतीरवयैः ॥

११४ कविस्सनो कर्षति यो न सज्जनान् न सज्जनो यस्य न पूतमानसम् ।
न तत्पवित्रं यदि नास्ति शीलिता न शीलिता सा यदि दम्भसंयुता ॥

११५ मूढा ये कवितापटुत्वरहितास्संस्कारहीना अपि
तेषां मूर्ध्नि निधायकालपुरुषः पादं नरीनृत्यतात् ।
मातर्मे सुधियां मनांसि कविताज्योत्स्ना हि सन्द्रावयेत्
काळी दुष्टविनिर्मिताय तमसे क्रुध्याद्विभिन्नागुणैः ॥

११६ शब्दार्थरूपवपुषा कवितातनूजा माधुर्यसद्गुणयुता जयतात्कवीनाम् ।
नूनं रसज्ञहृदयेषु मुदं विधात्रीं श्रीभारतीरितिदशा सुमसङ्गकर्त्र्या ॥

११७ हिमकरे तमसा खलु लग्नगे रविसुते नवमे तनये कुजे ।
स्वकृतकर्मफलं लभतां नृणा इह हतशा प्रविनाशय तां दशाम् ॥

११८ वनचरेण जितारिणि तारिणि सुविषमे न शिवे रविणा नुते ।
जननि चास्थिभयं विफलीकुरु तव रुचा पदयोरिहभावये ॥

११९ कुजजभीतिमिहैव विनाशय सकलसद्गुणराजिविराजिते ॥
न नियमस्य यमस्य ममास्तिभीः अफरणे मरणे चरण भृतीः ॥

१२० नीचास्सन्तु सहस्रशो हि भुवने दुर्गर्वमत्ता गजाः
तेषां चञ्चलचित्तजातवचनैः किं जायतेऽन्धैस्सताम् ।
एकेनापि ह सज्जनेन कविता सम्यक्स्तुता मे यदि
धन्योऽहं वरदे पवित्रितमनो मेनास्ति नोचेच्छिळे ॥

१२१ क्रन्दिते तव शिशौ मयि दृष्टिं कारुणीं क्षिप हितङ्कर मातः ।
पौरुषं सहज लोहितगात्रि भानुदीप्तिलसिते कुरु मह्यम् ॥

१२२ कुशाग्रीया तन्त्री मनसि लसतात् खण्डपरशोः
किरन्ती कान्तं मां जनयतु हि वेदान्तपथकम् ।
खलानां सेवायां नयतिकुजनो ज वितमहो
न पन्थामे भूयाज्जननि नगजे पौरुषयुते ॥

१२३ केशककेशवयुक्ता पुष्पन्धय भासमान सुखकमला ।
कमलाऽमलदा जयतात् सुकवीनां चित्तकुमुदसुज्योत्स्ना ॥

१२४ नृत्यन्तीभिः स्थिताभिर्हर नयनजपापुष्पजाभिर्हिरुग्भिः
कात्यायन्यार्वयुक्ता स्स्मररिपुहननोद्भूतरक्तश्रियस्ते ।
मातुर्गण्डस्थलस्थाः प्रणयकलहजा बिन्दवः पान्तु तान्तेः
पन्थानैंज्योतिषोनः प्रददतु मनसो द्राविणः कामहन्तुः ॥

१२५ नीचान्नसेवे कुजनान्नयाचे सत्पौरुषेणाश्रितचित्तवृत्तिः ।
कदा निवत्स्यामि विहायकार्यं दद्दे पुरारेः परशान्तियुक्ते ॥

१२६ रिपुपताविहचास्तनिकेतने क्षपदशां गुहभक्तविलोकिते ।
वरवरं वदतीं गिरिजां भजे कुकवि वारण वारण शक्तिदाम् ॥

१२७ भवानि नहिमे हिमेशतनये नयेरित सुधीस्सुधी विलसिते ।
सितेन हि पुरा पुरारिवनिते नुते सुचरणे रणे विजयदे ॥

१२८ नीचस्स्वोदरपूरणाय यतते मानं विहाये वयः।
माभूत्तस्यहि जन्म भारतधरादुष्कीर्तिकर्तुश्शिवे।
धर्माऽधर्म विचारणेषुपटुभिर्वेदान्तिभिर्दान्तिभिः
सा पद्मासन भासिताऽसितदृशा नः पातु या पूजिता॥

१२९ कर्त्रीत्वमेव विमलेसुनुतेनचाहं कर्त्रिद्विशङ्खसहितं मधुसूदनं श्रीः।
रज्ज्वा स्मरस्य दृढया प्रतिबद्ध चित्त देवी कटाक्षमहिमा विजयन्तनोतु॥

१३० नरिदरिद्रतया परितापिते न कविता क्षुदया हृदि मोददा।
भवति दीनजनाय च यस्यराः कवितया सफलं सहजन्म मे॥

१३१ संस्कारेण विहीनः नार्हति कविरिति पदं महेशानि।
कविता लेखन मात्रात् नगकुलपतिपुत्रि श्री मातः।

१३२ या स्थाणोरङ्गमायूजीवनस्य प्रदायिनी।
नीलोत्पलश्रियःस्पर्ध्री वेणी गौर्या नमाम्यहम्॥

१३३ हृदयं यस्य शुभावैः पूतं शमदम तितिक्षया युक्तम्।
देवीकटाक्षलसितः कश्चन कविर्महात्माऽऽर्येः॥

१३४ धारारूपेण यस्य प्रवहति कविता कालिके त्वं दृशा माम्॥
व्यर्था व्यर्था हिहक्तेध्यवहि कथितया चञ्चरीकैर्भ्रमद्भिः।
सौन्दर्यस्य भृगुभ्यः मधुकरपटलान् हेपयद्भ्यो नितान्तम्
कैरवेभ्यो वश्य सिद्धिः प्रभवतु गुणिनां साधकानामोमघः॥

१३९ पिनाक हीनापि पिनाकिनः प्रिया निवारयन्ती त्रपया करं विभोः।
लिडात्रिनेत्रेण शिवाङ्गसुश्रियः अनेकनेत्रेण विलोकितावतात्॥

१३६ श्यामायां पार्वतीवेण्यां कम्पयित्र्यां हभीमहृत् ।
कामिनीभि र्वृता मल्लौ भर्गदृष्ट्वा वियोगिनी ॥

१३७ यस्याः रुद्रस्य नेत्रे विविधसुमवने सञ्चरन्ती स्थिताधीः
कम्प्रं नेत्रं धरन्ती पशुपतिवदनं द्रष्टुकामं सुरक्तम् ।
ह्रीगाद्दृष्ट्वाम्रगीथां मधुकरमधुनो बिन्दुभिः क्लिन्नगण्डा
शातं लोकस्य दद्या न्ममजन वशतां काळिका पावयित्री ॥

१३८ ललितललितकान्तालालने लालसस्य
लनितसलिल बिन्दुः गण्डभागे सुपत्नी ।
पित हसित मयूखैः मुट्श्रियस्तारकायां
अवसित सितपद्मा पामदपाच्चि लोवः ॥

१३९ सर्वज्ञः कर्णिकामक्षररुचिलसितां गौरि ' दृष्ट्वा मुमोद
मर्त्यं मर्त्यं पुनन्ती सुमशरदमनीं नौमि मुक्तिप्रदात्रीम् ।
नेत्रस्यास्याः, कबर्याः विशदसुमतनेः शोभया सा मिळित्वा
पाशैर्बद्धस्य नूनं गुणविलसितं मानसं वात्ररेजे ॥

१४० मज्जिह्वानाट्यरङ्गे कमलजललनाऽलङ्कृता सध्वनिश्रीः
नृत्यन्ती भावगात्री कुकविजनमुखं स्तम्भितुं या प्रवृत्ता ।
सा काळी धूम्रवर्णा चलदरुणदृशा भीतिकर्त्री रिपूणां
ज्ञानात्कालस्य नित्यं परशमसहितं पुत्रकं मां प्रकुर्यात् ॥

१४१ चिज्ज्योतिर्भावुका सा नयन जलनिधेः कामहन्तुर्नदीया
एनांस्येणीनिहन्यात् प्रणयजनिनदे लग्नकर्णाप्रमत्ता ।
यद्वेणी काळिकाशं स्मररिपु नयनस्तोककानां हि काली
सर्वीयं गर्वयुक्ता वितरतु सुगुणैर्भासयित्री जडं माम् ॥

१४२ भृङ्गी सङ्केतगात्री वदनयुगलकालासिका कल्पितश्रीः
कण्ठ वानकणा सा परभृतपटलैस्तत्र मार्दङ्गिकैस्तैः ।
चिच्छक्तिस्था त्रिनेत्रावयवजनयुता निर्मलं सद्म दद्यात्
रुद्राणी नाट्यशालाप्रवरजनततेश्शाश्वती चित्कलायाः ॥

१४३ सदा सदा सदासेन पूजितं नयनं श्रियः ।
रक्तपुष्पश्रियश्चोरि नीलकान्ति विभावितम् ।

१४४ न केवलं सिध्यति विद्यया गुणः खलस्य शक्तेः करुणां विना हृदि ।
अनेकजन्मार्जितपुण्यपालिते विभाति चित्ते गुणसम्पदः कला ॥

१४५ पशूनां भर्त स्त्वं सहवससि पद्मेऽतिविमले
तुरीयातीतायां ममजननि वासंप्रकुरुतात् ।
अनित्या दिक्कान्तामुख जनितहासेन मिळिता
नकाङ्क्षा कीर्तीर्मे जगति विषमे पार्वति शिवे ॥

१४६ माया विनाशयति मे भवतापदुःखं मायाऽविना परिवृतं पृथुकम्पुनाति
मायाविना मनसिजेन दृढं निबद्धं मायाविना न हि विभात्यवनायशक्तिः॥

१४७ अर्कदीप्तिलसिताऽम्बरन्धरत् लोहितोरुत सहितं सुवर्ष्मं ते ।
इन्दिरे गुरुकळत्र भासितं राव जन्म सुखदं वराजते ॥

१४८ कथमिहमुक्तिं लप्स्ये जगतो जडतो विभिन्नतायुक्ताम् ।
विद्या विद्याऽविद्यां मामे शान्ता विभिद्य सन्देयात् ॥

१४९ तेनुस्तेनुर्नयनमयूखावुद्धौ माभद्भ्मे नयनसमर्था रम्याः ।
नूनं नूनं नगपतिपुत्र्याः पादं शक्तं शक्तेर्भवपरितापात्त्रातुम् ॥

१५० कुरुते सुजनो न दोषदं यदिबद्धः कुरुते विधेर्वशात् ।
परिपक्वदशाम्भजन्मनो विमलं याति पदं सुरद्विपः ॥

१५१ उपनिषदुपवनपवनो दुरितं विरलंघनं विनाशयतात् ।
सद्भावपुष्पवृष्टिर्दधती शान्ति सुसौरभां भूयात् ॥

१५२ पराजय शत्रुगणे करोतुसा परा जयं मे सकलेषु कर्मसु ।
विमोहदा कामरिपोर्महेश्वरी प्रदुःखितां कामरिपोर्भिनत्तुमे ॥

१५३ खलतया सहितान् करणे सतः खलतया सुलभं नहिचान्यथा ।
सुजनता जनताप विनाशिनी भुवनपालिनि पार्वति दीयताम् ॥

१५४ विषयलोलतया लतया मनोमधुकरोऽतितया हि विलोभ्यते ॥
गुणमयीं प्रकृतिश्चिदुदास्यते ननुधृातपि मया खलु पश्यता ।

१५५ सहस्राराम्भोजा ध्वन सु मम नादाविपिमलः
समः स्वध्वानेन सृजति जगतीश्चित्र मिव या ।
क्षणं लीनंचित्त शमितविकलं पार्वति कुरु
जरामृत्युव्याप्तं भवजनिततापं शमय मे ॥

१५६ विभिद्यत्र वं तिस्रो भुवनपरितापं ददति याः
सदास्फूर्तिश्शक्तेः कुरुमनसि काङ्क्षा विरहिते ।
रिपोः कामाद्रक्तेश्चरति तनयो यस्तव यथा
कदाचापात्यत्रा पृथुक कुरुणे मोक्ष्यसि च तम् ॥

१५७ त्वन्मन्दहासकिरणं किरणं हिमांशोर्भ्रान्त्या चकोरवनिताः परिवभ्रमुस्त्वाम्
मत्वा हि चातक शकुन्ति पतन्ति तेते कैश्यं पयोदमिति विष्णुहृदःप्रकम्पि॥

१५८ यश्चास्पर्धिष्ट पादो रविनिशितरुचा चन्द्रनाशे विपतौ
विभ्रय नूलघृष्टान् मुकुटमणिसुतान् भासुराणां सुराणाम् ।
स्पृष्टस्सन् केशसङ्गे रतिपतिरिपुसम्पेरिता दृष्टियुक्तः
वह्नेरुद्भूतधूमै र्वहति हि समतामाज्यधारायुतस्य ॥

१५९ सुरूपराजिता पराऽजिता पराऽजितारिव
र्गमोह काष्ठभेदने कुठारिकाप्यकुण्ठिता ।
महीध्रराट्सुतां सुतारिणीं सुतारि सुङ्गजित्
पटेयसीमसूयतिस्म कोकिला दरातु या शिरम् ॥

१६० महर्षिहर्षवर्षिणी ह्यकालरोगभञ्जिनी महर्षिताप्रहर्षिणी सुतप्ततापतस्करा ।
निशाचरेण सञ्चितेन कर्मणायुतं सुतं सुधाकरस्य सुन्दराननस्य ते पिपर्तुरुक् ॥

१६१ शृङ्गारभावसुतरङ्गमनःपयोधेरेषाम्बभूव गिरिजाधर चन्द्रदीप्तः ।
क्षीण दशाऽभ्भजति तरसति मित्ररत्ने सम्बोधनीयमिति बोधयतीव रेजे॥

१६२ याश्वेताधर बाल चन्द्रदशके विभ्राजिता धूर्जटि
दृष्टिश्री सुतरङ्गरञ्जितरुचा नेत्राख्यपद्मैर्वृता ।
यानीलोत्पलयानपात्रलसिता सन्मौक्तिक श्रीयुता
सा पायाच्छिवबाहु विष्णुपदजा दृष्टा समुद्रायते ॥

१६३ त्वं रक्षस्व दयालुधु द्रुततरं कामत्सुवेद श्रियम्
वेदोक्तैर्बहु कर्मभिर्गुणवतोबध्नस्त्वु नैर्हेतु हि ।
बुद्धत्वं समवाप्य दुष्करतपःकृत्वा च जल्पैर्मुहुः
व्रह्मीभूय च मायया बहुविधे स्तांश्यावयामासिथ ॥

१६४ हिंसेतिराजा यदिशिक्षयेन्न स्वेच्छा प्रजा सूद्धतमाविरास्ते ।
कुम्भीलकाश्शान्तिमपाहरन्ति क्षोभस्त्व धर्मैकनिदान आस्ते ॥

१६५ वेदोक्तधर्मेण जनाश्चरन्त्वित्युक्तं त्वया मातरनङ्गहन्ति ।
त्वत्पादमूलेपतितस्य मेऽस्तु प्रभनाखानां च हृदन्ध भस्त्की ॥

१६६ राजन्महादेव नेत्रप्रमाणा भास्वालये मानसे लोकपालि ।
अन्ध जरीजृम्भमाणं हृदि त्वं रुन्धस्त्व दृष्ट्या बहुशुभ्रकान्त्या ॥

१६७ चञ्चलत्व विहीनाया भवत्या नोचितन्त्विदम् ।
निरुद्योगेन मच्चेतः क्रकचेनाप्राहिरैनुदा ॥

१६८ उपेक्षां चक्रिषे पूर्वमिति नाम्बवदाम्यहम् ।
यतो मूर्धनि विच्छिन्ने ह्युगोपायस्त्वमच्युते ॥

१६९ सपुरा मन्मथोनष्टो रिपुरास महाबली ।
त्रिपुरा हन्तुवं देवी त्रिपुरारि नितम्बिनी ॥

१९० अपालयस्त्वं गतजन्मराजो अपालबाला मुखकञ्जराजे ।
अपालयाऽऽकर्षितलोकराजे अपालयोऽहं त्वयि गौरिराजे ॥

१७१ मुखात्सुधां चोरयिता हिमांशुः हिमांशुना कारयितासि दीप्तिम् ।
सुतायते तारयिता सतापात् चित्रं जगद्धारयितासि कर्हि ॥

१७२ परचिता रचितार्थं शरीरिणा परिचितोऽहमतश्च तदुक्तिवः ।
विरचनेन सुते एव मांशिवे अरुचितो न मुखं परिवर्तय ॥

१७३ सुखं हरेण क्रीडन्तीं जगद्व्यापारवर्जिताम् ।
नाहं शब्दापयामास चाद्यशब्दापयामिवे ॥

१७४ वात्सल्यमस्तियदिमौनि समर्चिताङ्घ्रे मात्रीयतीश ललने मयि
मुक्तबन्धे ।
जाया सुतोहि जनको जननीकुमारः इत्यालपन्तमिम मम्ब दयस्व
साध्वि ॥

१७५ जायापित्रादिषु मे तेषां मयि चापि बन्धनाशाय ।
त्वं कुरु यथेच्छसीशे सन्त्यक्तालोक शिव पत्नि ॥

१४६ इत्यश्रौष्महि मातः पश्येच्छ्रुणुयात् स्मरेत् परोध्येयात् ।
अथतु सगुणो भूत्वा ध्यायामि च निर्गुणत्वाय ॥

१७७ सगुणध्यानयुजोमे क्रमशो नैर्गुण्य भावनास्सन्तु ।
विजितेभ्यो नेत्राभ्यां पद्मेभ्यो भवतु मे च नैर्गुण्यम् ॥

१७८ आदयिषातः त्राणो मातश्च पिपायिषात इन्दुश्रीः ।
विरमतु विरमतु कृपया पदयोर्युग्मेरमै रमारूपे ॥

१७९ अपिनः सुरविद्विषश्चापिनः समरे वेदमयी त्वमीश्वरि।
अवधा स्मुल्लमम्ब तद्ज्ञे विदे प्रभयान्धं भिदया दयावति ॥

१८० सत्कर्तुमपि मर्त्येभ्यो नमे शक्तिर्ददं यत।
त्वन्नुत्या सफलास्सर्वे वन्ध्या काङ्क्षातु मे कथम् ?

१८१ सुमनाश्चयच्छितकचे सुमनस्त्रीनिषेविते।
सुमनो देहि फल्याणि सुमनायक शोभिते ॥

१८२ दारुणा अपि भावा मे जायन्ते हेतुरस्य तु।
परीक्षा तव भक्तस्य त्वद्भावलसितात्मनः ॥

१८३ नाशयित्वा जगन्मातः कर्मबन्धं शिवे कुरु।
भावे प्रयोगमिवमां भावनां सर्वथात्मजम्।

१८४ नाहं जानामि यत्काङ्क्षे त्वया पृष्ठे मयीश्वरि।
किन्तु विज्ञपनं यं स्यात् बुद्धिहीनेन सचिते ॥

१८५ मरालेन च विद्राता स्थ यने न पुरस्तव।
श्रूयते च त्वयाक्षेषु जितेनापि पुरद्विषा ॥

१८६ जितौ मुखेन पद्मेन्दू न चोरीक्रियते मया।
ताभ्यामेव जित वक्त्रमतो चक्षणोर्न लक्ष्यसे ॥

१८७ मुखेन विजितौ पद्मचन्द्रौ चाक्ष्णा सुमोत्पले।
जिते न श्रद्धयामश्च गत्या हंसी जितेति च ॥

१८८ यद्दूरीकुरुषे नैव जयाय कृतनिश्चया।
छायाहि वादिनीहीना चर्चानारभ्यते क्वचित् ॥

१८९ आयाहीति मयाप्रोक्तं क्षमस्व सहसा शिवे ।
त्वद्दर्शनेन चाद्वैत सिद्धिश्च परिलिप्सया ॥

१९० ज्ञातस्त्वमिति मां यावन्नब्रूषे दयसेऽवसि ।
बालिशस्य नमे तावत् रोदनेन विरम्यते ॥

१९१ आदौ त्वमेकासि चितिस्वरूपा सदात्मिके चाप्यसदात्मिकेऽम्ब ।
शक्त्यां गुणिन्यां तव च प्रभावात् अभून्महत्तत्वमरालकेशि ॥

१९२ आत्मानं व्याकरोर्मातः विश्वे नोत्पित्सया स्वयम् ।
महत्तत्वादहन्तत्वं तत्रैविध्यमजायत ॥

१९३ मुन्योघसंसेवित पादुकायै नमस्सहस्राक्षि सहस्रपादे ।
वर्णीन्दिरोर्वीध्र सुतात्मकायै समस्तवस्त्वंतर देवतायै ॥

१९४ आप्यायिन्या नाथा पुत्रेऽक्ते क्षुषितवति जनिमति ।
गौर्या मौर्या दृष्ट्या श्रीशक्ते मयि किरदशमिहहि ॥

१९५ रौरवादि नरकानुपभोक्ता मातृवित्त पितृकामिनीयुतः ।
हाघभाजिषि च मातृगर्भके ह्यर्भकश्च कलिना व्यतापिषि ॥

१९६ अवीचिमत्यां मेदिन्यां शतयोजनविस्तरात् ।
अपातिषि गिरेः शृङ्गात् काठिन्यायां व्यखण्डिषि ॥

१९७ मज्जासृजि पुरोयान्त्यां पृष्ठतो मेदनि स्थिते ।
सहाप्लाविषि दुश्शीलः अन्यैरुत्पथगामिभिः ॥

१९८ व्रतस्थस्सन्नपि शिवे सुरां पपिम कुत्सिताः ।
जिह्वायां दह्यमानायां अपायिष्महो द्रवम् ॥

१९९ यदृच्छया वृषल्यादि स्त्रियो जग्मिम काङ्क्षया ।
सूर्म्याति तीक्ष्णया कान्ता लौही नश्यविलिङ्गह ॥

२०० तत्रानुभुज्य च फलं कर्मणां हि रुदन्नपि ।
तातप्यमानो धावंश्च लोलुण्ठन् निश्वसन् बहु ॥

२०१ पुनः प्राणिन आरुन्धन् कृत्वोग्रं कर्म दुष्करम् ।
भटैरगमयं याम्यैः तैलेचापातयं कुधीः ॥

२०२ कर्तेतो दुष्करं कर्म नेतिनीचो व्यचिन्तयम ।
हा कुत्तिः कुन्त्यतेमेऽद्य कोवामामभिरक्षति ॥

२०३ नार्चितः परमोदेवः शुश्रावधुसत्कथाः ।
न चक्रे कर्म पुण्यंवै देव्या नाम जजाप न ॥

२०४ नानाद्रोहांश्च भूतेभ्यः पापाश्चक्रिम निर्भयाः ।
नरान् चुकुपिम मुधा निनिन्दिम च जघ्निम ॥

२०५ पिधाय नयने राज्ञः स्तेनयामासिथेति माम् ।
वदन्तो विविधाः पीडाः प्रापयामासुरञ्जसा ॥

२०६ उदन्यया परीतोऽहं बुभुक्षा जर्झरः पुमान् ।
नद्ये भक्ष्ये समीपस्थे नापारिपि मदोत्कटः ॥

२०७ असिपत्रो महान् वृक्षो रुरुहे जीर्णवर्ष्मणा ।
रक्ते स्रवति मच्चेतः पीडाव्याप्ते नयेश्वरि ।

२०८ संस्मृत्य यातनानाना प्राग्जन्मकृतकर्मणाम् ।
त्वं जीवोपरमेधाहि हद्धृहिष्कृतवासनः ॥

२०९ हृद्यन्धतमसन्देवि भिन्धि दृष्ट्याऽतिनिर्मलया ।
कैश्यफणोत्पलस्निग्ध नीलमण्यञ्चितत्विषा ।

२१० अस्मितामपि सुश्रीकर मस्मि तां शरणं श्रितः ।
अस्मितान्तस्तमोनुत्या अस्मि तापनिवारिणीम् ॥

२११ घटनाघटने भेद सम्बन्धौ नाशपालने ।
यस्या अधीने नित्यंस्तः तस्या नामानि च ब्रुवे ॥

२१२ गुहस्वरूपिणी गुर्वी गुणैर्गुरु नितम्बयुक् ।
उर्वीभवश्च फलिका रम्भोरू उरुसुस्तनी ॥

२१३ जीवत्वनाशिनी मोहभेदिनी शिवरूपिणी ।
लक्ष्मीनारायण स्रष्टृवाणीन्द्राणी सुरेश्वरी ॥

२१४ स्वाहस्वधामतिर्ह्रीर्धीः निर्भीका भीमरूपधृक् ।
भीमस्तुता भ्रमध्वस्ता वीचीविभ्रमदर्शना ॥

२१५ विवर्तिनी जगत्त्वेन वर्तुलस्तनशालिनी ।
आवर्तनाभिर्द्विहन्त्री नामाऽवर्तन सुप्रिया ॥

२१६ सुश्रोणिर्जितराजीवश्रेणिश्श्रेष्ठा शिवङ्करी ।
भक्तिनिश्श्रेणिकाचित्री विश्राणितकुदानवा ॥

२१७ सकामाऽपि च निष्कामा कामसञ्जीवनी शुभा ।
कामारिपार्श्वा निष्कामवन्दिता पद्मलोचना ॥

२१८ वैखानसादितन्त्रात्मा खोद्भवा खञ्जनाम्बका ।
चिरसञ्जीवसजश्रीका सुसख्य सुमुखे मयैः ॥

१२९ मत्ता मतङ्गजगतिः मतङ्गमुनिसम्भवा ।
सम्मता विमताचार दूरा माता निलिम्पपा ॥

१३० रागद्वेषाङ्कुशधरा कुशाग्रीया कुशस्थितिः ।
कुशीलहन्त्री निष्पापा अगस्त्यादिनुतोत्तमा ॥

१३१ सुश्रोतव्या परिद्दश्या मन्तव्या मेयरूपिणी ।
संशयघ्नी सर्वतन्त्र मूलरूपा परात्परा ॥

१३२ चलाक्षी चालितारिश्च निश्चलाऽचलसम्भवा ।
लोकताागणतनुः तन्वी च सुमध्यमा ॥

१३३ कवयित्री च श्रीचक्र रूपिणी बिन्दुसंस्थितिः ।
लेखयित्री वाचयित्री कारयित्री सुलोचना ॥

१३४ ग्रन्थस्य कारयित्री च कर्त्री ग्रन्थस्वरूपिणी ।
एकाकिनी ध्वस्तभेदा तत्त्वमस्यादिनिश्चिता ॥

१३५ तारा कर्णपिशाचिनी मधुमती प्रत्यङ्गिरा श्यामला,
मातङ्गी प्रमदानन्दा च कमला काळी च वावादिनी ।
वाराही सुरदीर्घिका च ललिता सिद्धिर्मतिर्भैरवी
गायत्री हि समस्तमम्ब भवती तुभ्यं नमांस्यम्बिजे ॥

१३६ मुनिमानसहंसि हंसि भोस्सकलान् दण्डयसे कुभीतिदे ।
न तथापि खलो निवर्तते सुजनं बाधत एव हा कलौ ॥

२३७ विषावञ्चितमानवान् प्रति घनं त्यक्तुं नमे रैचयम्
भोगेष्वस्ति तथापि धीः बहुतृषा नूनंव्यथिद्यं पुरा ।
संसारे सुखलेशमप्यनुभवन्नोचेष्टते कर्मसु
स्वान्तं मे तवनामसंस्मरणजं लप्स्यामि सौख्यं शिवम् ॥

२३८ पुराऽभवच्छत्रुगणान् गुणान्विते बभञ्जिथत्वं कपटे दुरात्मनाम् ।
पुरापि दद्रष्ट सुरारिकल्मषं पदस्य तेपातु कला कलावपि ॥

२३९ यथा शिशुर्हस्त पदादिचालनैः महासमुद्र प्लवनं विभावयन् ॥
महाहवे शत्रुजयीव तुष्यति तथा कवित्वभ्रमसंयुतोप्यहम् ॥

२३० अणुर्यथा व्रीड्यतितेजसां निधिं निरीक्ष्य तद्वत् महतोऽहमम्बिके ।
तथापि देवेन्द्र मुखातिदुर्लभं त्वदीयपादं श्रितवान् कर्केनरान् ॥

२३१ विभावनामकम्प्रस्य कस्य कस्य ददासिभोः ।
कोपने खोषनानस्य को नुत्के विराजिते ॥

२३२ सादान्माल मरुणकुसुमां शम्भवे स्वपियाय
भ्रान्त्या रम्यं नगपतिसुतापाणिमेवास्पृशत्सः ।
गौर्या दध्रे पुलकविभवो विस्फुटन्नेत्रयाऽहो
नैव त्याक्षीद्विदितहृदयः कामहन्ता पि कामी ॥

२३३ ईर्ष्यासूयाकृतवैरं त्यजन्तां मानशा भुवि ।
स्पर्धालवो गुणौघेषु भूयासुर्मुक्त किल्बिषाः ॥

२३५ क्लिश्नामि मन्मथशरपतिबद्धबुद्धिः मथ्नामि शास्त्रबचनेषु सुधां न मातः ।
गम्भीरवागुपनिषत्सु न सारवेत्ता नात्याक्षिष रिपुगणं तरलं मनोमे ॥

२३६ मध्या दधर्मे गिरिराजपुत्रीं मन्थ्याज्जनो धर्मेऽथं सुशान्त्यै ।
त्यज्यात् कुभावानपि जीवहिंसां जामात्सुभाव प्रसवच्छितोना ।

२३७ याबालचन्द्रः परिपूर्णचन्द्रात् शोभासमुल्लासकृदित्यभाणीत् ।
सागूढभावा निखिलार्थं वेत्री पायाच्च शम्भोर्मुखतोनिरुद्धाः ॥

२३८ या कामशास्त्रेण हि धर्मशास्त्रं समर्थयन्ती समता विशेषात् ।
सम्मानयन्तीं शिरसाऽर्धं चन्द्रं तदाकृतिश्चापि विनौति सा जयेत् ॥

२३९ न सामान्याहि सामान्या सामान्या ह्यष्टसिद्धिदा ।
नादरूपा न सामान्या जननी जगदम्बिका ॥

२ ० यालज्जया गिरिशनेत्रयुगम्पिधाना शक्तापि हस्तयुगलेन सरोजतुल्यम् ।
अत्रान्तरे भवललाटजनेत्र दृष्ट्वा त्रेषे मुवं मदनबाणहता निगुप्यात् ॥

२४१ स्वतुल्य मानवश्रेयः कर्मैस्त्यागनिश्चलाः ।
एधिधीरन्ननित्येऽस्मिन् त्यक्त्वा भोगेषु लालसाम् ॥

२४२ रम्भात्रययुतातन्वी त्यागारम्भात्मधीश्रियम् ।
ददिशीष्टच गोपाख्यान्मादृशान्मन्दमानसान् ॥

२४३ विष्णोर्विरहसन्तप्ता मृणालावेष्टिता रमा ।
रेखाभिस्तिसृभिः कण्ठे स्याप्ता पातु द्युकन्धरा ॥

२४४ म।मत्तनादि ं ववतां कुरु मङ्गळ नि शृङ्गार भावमखिलं विफली
कुरुष्व ।
वेद स्ततत्त्वपरि ूतमतिं स्तव चे मातः विधास्यसि कदा निखिले
शरण्ये ॥

२४५ हृदङ्गार ज्वाला असितमभवल्लोककठुमिः
वचोभिर्मेमातः त्वमपि ननु मन्दानव शिवे ।
अवाप्तं ते नीलोत्पल दळरुचिस्निग्धसुदृशम्
न किञ्चित्कर्तारो जननि ननु दुःखानि न सहे ॥

२४६ नमे माता पुत्रः रुचिरवनिताऽरक्तमनसः
पुराऽहं चाप्रीणाम्मधुरनुतिभिस्तव पदे ।
अहोदार्श बिभ्रत्तपनतनयः पार्श्ववसतिः
अनाथानां नाथे सजलनयनं भांषयतिमाम् ॥

२४७ न च पण्डित रञ्जनाय मे रसनिष्यन्दकवित्वसन्ततिः ।
कटुमानवचित्त कल्मषं व्यपनेतुं नुतयेऽम्बिके तव ॥

२४८ विजया विजयायुक्ता विजयाहीनापि हर्षिणी ।
तस्तम्भे ऋतुसङ्ख्यान्याऽविजया विजयप्रदा ॥

२४९ तवपादविलग्नमानसान् नितरां धर्मपथाश्रितानपि ।
भुवि साधुजनानुपेक्षसे वदमातस्सकलक्रिया बुधे ॥

२५० भिन्नेषु मूर्धसु निधाय पदानि काळी हस्तस्थकङ्कणमयूख विभक्त मागा ।
साऽनूनशोणरुचिभिः परिपूरिताङ्गी लालाटनेत्र भवरुग्वशिवेन दृष्टा ॥

२५१ किञ्चिद्भ्रूभङ्गभीमा पुररिपुवनिता विस्मृत भिश्शिवाभिः
पानं रक्तस्ययुक्ता गरुडवदनविक्षिप्तमांसाशनाभिः ।
पादैश्चूर्णीकृतास्थि प्रकटितविभवा प्रेतसङ्घान् हसन्ती
अक्षि ज्वालाविमिश्रा रुचिर पदगणाक्रान्तभूता हि गुप्यात् ॥

२५२ कमलं कमलं कमलाऽमलदा व्यभजत्सहसाऽतरला मलदा । ;
कमलाक्षमनश्यत दृष्टिशतैः कमलङ्करणं न हि तोषयति ॥

२५३ नयति नियतिः क्वायं लोके स्वकर्म यथा तथा
नियतनियमैः बद्धोनाहं यतीश्वर संस्तुते ।
यशसि मनसः काङ्क्षा शास्त्रे न वस्तुनि मे शुभे
अविरळपतद्दृष्ट्यम्भोजैः कृपामयि रक्षमाम् ॥

२५४ कपटपटपटंपटु पपातधर्मे,
हनहनगसुते महिमभिरसमेते।
भवविभवभवस्य हनने रयेण
हृदि ममचलतः कटुपदस्य मातः ॥

२५५ विवेदवेदं विधिवज्जुहावनो न तीर्थसन्दर्शनलोलुपत्वयुक् ।
न मन्त्रनिष्ठः न सतामपूजितः न पाण्डिती धीरपि पाहि बालिशम् ॥

२५६ आपदापदपदं पदं श्रितः अस्मि कर्हि भवपाशदारिणि ।
नामसंस्मरणजाश्रुसन्ततिः जायते वपुषि कम्पनं कदा ?

२५७ यदा करीन्द्रः मदपूरपूरितः मनोर्णवेऽहङ्कृतिनक्रकर्षितः ।
शुशोच चुक्रोश निरस्तपौरुषः तदात्वरक्षीद्ध्रुवदक्षिचोदितः ॥

२५८ तथैव मां रक्ष धियः प्रवर्तिके न चेत्प्रपञ्चस्य विलीनकारिणम् ।
वदामि तातं ह्यखिलौघनाशिनि न कोऽपि भक्तो भविता त्वदाश्रितः॥

२५९ क्षन्तव्यं ममचापलं करुणया भक्तस्य दीनस्य मे
मा भाम्याः यदवोचमेव तवहक्सम्पादनालोलुपः ।
मूढत्वाद्यदवादिषं जननि भोस्तत्रस्थहेतुं शिवे
जानात्येव हि कामनोदधि परिश्रान्तात्मतापप्रणुत् ॥

२६० चकार सुभ्रू र्बहुधा मनोद्भवः अभाणिषुस्तं रहितं हि वर्ष्मणा ।
समस्तवस्तु प्रतिभासितस्य भोः जिघांसुताहन्त पफाल शाङ्करि ॥

२६१ स्वपादताडनक्षुब्धरवद्राक्षस सङ्कुला ।
विद्रुमद्रुमकान्तार संशोभितलता मवा ॥

२६२ नेत्रसन्दर्शनस्पर्धा विकसत्कमलाकरा ।
कङ्कणस्थमहद्रत्नकान्तिर्नीराजिताऽजिता ॥

२६३ क्रन्दत्फेरुरवव्यासभीम कङ्कणनिस्वना ।
स्वतर्जनाङ्गुलिभ्राजन्नखभीषितधर्मराट् ॥

२६४ निरन्तरपतद्दृष्टिसङ्कुचत्कुमुदावृता ।
कासारमीन सञ्चार गर्वचालितलोचना ॥

२६५ नीलालकतमोव्याप्तफुल्लनेत्राम्बुजद्वया ।
स्वापाङ्गमालासम्बद्धभर्गवीक्षण विह्वला ॥

२६६ अवनीमवनीपवने पवने परिवातिनिवासिनि चन्द्रमुखि ।
पदनूपुरतः पुरतः सरितः प्रसृता घृणयस्तरणं ददतु ॥

२६७ न तनये तनये विनयप्रदे भवजदुःखशतं रिपुदेवते ।
सुजनदुःखकरीर्जगतीगतीः न सुमतिर्विमृशन् खलु वर्तते ॥

२६८ मन्नौनानानमेनूनं मनोमीनोमिर्मम न ।
मानोनुन्नोमनोनुन्मे नमोमानामिमानिनि ॥

२६९ प्रमादाद्वृत्तिरायाति वृत्तेर्मानसकर्षणम् ।
वीक्षणं विषयांस्तेन तेन भोगेषु लोलता ॥

२७० तया चेन्द्रियसङ्घर्षः कुत्सितास्तेनवृत्तयः ।
तेन पापस्य करणं नरकं दुःखद ततः[॥

२७१ अनुजावसयायुक्ते मातृगर्भे स्थितिस्ततः ।
ततोजननबन्धौ स्तः जरामृत्यू ततस्तत- ॥

२७२ एवं बम्भ्रम्यमाणाच्च शोकदान्मोह बन्धनात् ।
भिन्नस्त्वं कुरुमे मातः प्रार्थयामि पुनः पुनः ॥

२७३ गौरीराजतभूधराम्बुधिजले वेदोक्तमन्त्रध्वनौ
अच्छाच्छप्रतिभासमानवसनाविर्भूतफेनावळौ ।
लज्जासङ्कुचदक्षियन्त्रघटिता शृङ्गारनौकाप्रभोः
मन्दहष्ट्यनुकूलशीतपवना संरक्षतां नश्चिरम् ॥

२७४ नेत्रं ग्लौरितिसुधिया मन्ये विकसन्ति नात्रकुमुदानि ।
फुल्लन्ति यदा दक्षिणनेत्रे विलसत्यहो मातः ॥

२७५ धर्मे प्रकाशमुपगच्छति नैजशक्त्या क्रीस्तुत्वमाप्य परिदर्शितनैकशक्तिः ।
जीवान् ररक्षिथ जगज्जननि त्वमेका सर्वसहाविजयसे हृदि दयास्रवन्ती ॥

२७६ भजध्वं मयि विश्वासं मामेनानुसरन्तुह ।
अहं सन्तारयिष्यामि क्रीस्तुस्त्वं च समागदः ॥

२७७ मक्कादिपुण्यस्थलवासिनीयं महम्मदासूचित निर्गुणत्वा ।
विराजतां सर्वजनानुबन्धा समस्तजीवान्तरगा च शक्तिः ॥

२७८ सैवामृतसरस्स्था च गुरुनानकसंस्तुता परा ।
विचित्ररूपाजननी मानवत्वप्रदर्शिका ॥

२७९ श्रीहर्षमाघादिमहाकवींसान् प्रणम्य भक्त्याऽक्रियतस्तवोऽयम् ।
लक्ष्मीपदाम्भोरुहचिन्तकेन तस्याः कटाक्षं प्रभजन्तु मर्त्याः ॥

२८० युग्मे लग्ने सुरवरगुरुः वाग्गृहे शुक्रकेतू
सिंहे हेळिर्धरणितनयश्चाष्टमे सैंहिकेयः ।
जायाभावे तुहिन किरणः सौम्यदेवः कुमार्यां
बुद्धिस्थाने दिनकरसुतस्सौख्यवेदान्तकर्ता ॥

२८१ यस्यैवं प्रविभान्ति कालचलने मूलंग्रहाजन्मनि
येनाजापि सरस्वती करुणया मन्त्रश्च शुद्धात्मना ।
तेनेयं निरमायि निर्मलनुतिः वागीश्वरीतुष्टिदा
काळीपाप विनाशिनी त्रिजगतां शांतप्रदेयाच्छिवा ॥

२८२ अर्कंदे तिलसिताम्बरन्धरत् लोहितोस्र सहितं सुवर्ष्मते ।
इन्दिरे गुरुकळत्रभासितं राजजन्म सुखदं व राजते ॥

२८३ इत्थं न्यभाणि जननीललिताम्बिकायाः
ब्रह्म स्वरूप सुपभाज अनाथभर्त्याः ।
आचिन्त्रिषिद्ध गुणकेश पुरायं भिन्न
रूपाऽमादिहरणी मयि चाविरस्तु ॥

२८४ सौस्निग्ध्यं ददता विकतत्थनतया सङ्गद्रुहो भिन्दता
प्रत्ने सारमुचो विनिन्दितवता नव्यस्पृहां बिभ्रता ।
चैतन्यं व सुरद्विषो 'वतरता वामेतराक्षा महन्
श्रीदेवीपुकलाविभूषितगुरो काल श्रृणुष्व प्रिय ॥

२८५ दुन्दुभिध्वानगम्भीरः दुन्दुभिर्निस्समागतः ।
वाचाल इव चानुष्णः आसीदिति हि मन्यसे ॥

२८६ पुरोभ गीव माभूस्त्वं कलाविव च कुत्सितः ।
परावर्तयितुं ह्येतान् भवांश्च भविताऽपटुः ॥

२८७ आर्षवाण्यामविश्वस्ताः विश्वास्यवचनाः परान् ।
नीरसा बहिरन्तश्च ह्युन्मत्तानीव मानवाः ॥

२८८ धिक्कुर्वन्तः परां वाचं भौतिकीं दृष्टिमाश्रिताः ।
प्रत्नसारं विजानानाः रटन्ति नठशेखराः ॥

२८९ अधिक्षिपन्तः समतां जनानाम्
भिदामुधाकल्पित वैमनस्याः ।
चिह्नीकृताङ्गाः हृदिकल्मषाढ्याः
कथं ननिन्द्याः विषपादपाभाः ?

२९० सिद्धान्तैर्मधुरैर्वाक्यैः बहिश्शुक्लीकृतो नरः ।
अन्तर्दुर्भावनाकालः छायाचित्रसमो मतः ॥

२९२ स्वप्रयोजनमुद्दिश्य सर्वेस्सिद्धान्त उच्यते
साधारणोऽपि नियमः पाल्यते न हि केनचित् ॥

२९३ परं विनिन्दन्ति मिथस्समेताः
शिष्ट व्यतीते मनुजे द्वितीयम् ।
विनिन्दितैश्श्वः मिलतीहमर्त्यैः
स्मिताननो भिन्दति तं परश्वः ॥

२९४ आर्षदेवे विनिन्दन्ना उभे अपि समाश्रितः ।
मिथो वयस्यौकथितौ रैनिबद्धहृदौ बत ॥

२९५ ज्ञानिना दुर्जनस्तुल्यः न बिभेति कुतश्चन ।
पण्डितम्मन्यवचनं कलौ प्रामाणिकं स्मृतम् ॥

२९६ गुणाभिरामो भक्तस्स्यात् तद्विहीनो न भक्तिमान् ।
भक्तवेषोऽपि गुणमुक् नोपसर्प्यः कथञ्चन ॥

२९७ खलाधीतानि शास्त्राणि कवित्वं सत्क्रियां विना ।
कलौ प्रतारणायैव युज्यन्त इति मन्यताम् ॥

२९८ निन्दिष्यते सत्यवचाः वक्रधीर्जीवने पटुः ।
धिया सङ्क्लिश्यते ऋज्वा हस्यते नाप्युदस्यते ॥

२९९ मुधपोऽपि स्त्रियाकृष्टः धनमादाय कर्मकृत् ।
साधुः कार्यालयेषूक्तः विघ्नकर्तुरकर्मणः ।

३०० वाचा निर्व्यसनं शस्ता कदाचिन्ना विनिन्दति ।
तमोवृत इतिप्रोक्तः नराम्नमिलतीतरान् ॥

२०१ सर्वां क्रियां हन्त विहाय केचन
गणैर्वृतां वाचमवेद्य भावनाम् ।
विगीयमानां रसिकैः प्रयुञ्जते
सभासु तारं पिकवर्धना इव ॥

२०२ भावैरार्द्रीकृतस्वान्तः श्रुतकोशस्तु सज्जनः ।
शस्यते मधुरालापः वनप्रियसमः कविः ॥

२०३ विमर्शं लोकवृत्तेषु कुर्वाणैस्सुविमृश्यताम् ।
कुतो न युज्यते शास्त्रे विमर्शः काव्यवस्तुनि ?

२०४ खलेषु चिरजीवत्सु चिरं जीवन्तु पण्डिताः ।
श्रेयान् समज आख्यातः समाजे कुसमाजतः ॥

२०५ सङ्ख्यातद्भिरितिप्रोक्ते तेभ्यो द्रुह्यन्ति कुत्सिताः ।
जगच्चित्रमहोरम्यं निर्मितं वेधसा बुधा ॥

२०६ कार्यालये कर्म न कर्तुमीहते
अस्मासु कुप्यस्त्वपकर्तुमिच्छति ।
मौने सताऽप्तेऽपहसत्यहो खलः
दृष्ट्वा नरान् वक्ष्यसि किं सुहृज्जन ?

२०७ अनोकहान् नव्यदलान् विधात्री
वसन्त लक्ष्मीर्भविता सुखेप ।
प्रफुल्ल कल्हार सरोवर श्रीः
चेतस्सु देयात्समताममत्वे ॥

३०८ यथा वर्धमहि वयं सम्यग्दृष्ट्या तथा महन् ।
क्षिप्र कुरुष्व भगवन् स्वागतं ते सुखावह ॥

३०९ राराजतां सत्कवितास्रवन्ती
अभ्यस्तशास्त्राः कवयो लसन्तुः ।
कर्तव्य मर्थं प्रदिशेद्बुधां गीः
दयावती स्यान्मयि धातृकान्ता ॥

३१० काल श्रीललिता रूप श्रुतं वा नवजीवनम्' ।
कथं वसामो भगवन् वर्षं कारुण्यशीकरान् ॥

३११ शब्द ब्रह्ममयं' इलाम्रजनना ऽव्यक्तस्वरूपा शिवा
चन्द्रार्काग्निमिदङ्गता भगवती नीलामहं श्रीरिति ।
पाक्षाच्छक्तिरिति क्रियेति महतीच्छा शक्तिरूपा शुभा
श्रीवत्साकृतिरस्तु नश्शिवकर देयात्परं चैहिकम् ॥

३१२ अमपञ्चकदावाग्न वन्नपूर्णऽपिवास्ततिः ।
अन्नभिक्षां ज्ञानभिक्षां देहीहा मुत्र शर्मणे ॥

३१३ मनोवाग्रूपिणौ वन्दे वरुणापोमयौ शुभौ ।
सावित्रीं सवितारं च क्षुत्पिपासापनुत्तये ॥

३१४ श्रीचक्रनाभौ शुचिमण्डले तौ सूर्याम्बुजारी तत ओं कृतिर्वै ।
बिन्दूत्तराकाशमयीं शरण्यां क्षीरवसिक्तां त्रिपुरांस्तवीमि ॥

३१५ ब्रह्मात्मिका या प्रकृतिः पुमान् या
धनञ्जयाभा तपसा ज्वलन्ती ।
क्रिया प्रविष्टा दधती सुरादिं
गीर्गौश्च दुर्गाणि निहन्तु दुर्गा ॥

३१६ भ्रमध्येऽङ्गुष्ठमात्रान्तां दीपस्य शिखया समाम् ।
स्वाधिष्ठाने प्रवाळाभां लिङ्गरूपां भजेच्छ्रियत् ॥

३१७ धीच दयित्री विमला चन्द्ररेखा विभूषिता ।
परादिवैखरी रूपा जिह्वायामस्तु भारती ॥



भगवते लेखः

व्यङ्ग्यचित्रम्

अस्मात्—

निष्ठल सुब्रह्मण्यः,

14/270, वेलाजीनगरम्

निड्डुब्रोलुपुरी ।

तस्मै—

भगवान्,

भक्तसमीपम्,

वैकुण्ठम् ।

विषयः – मदीय जीवन वृत्तान्तः प्रार्थना सुखस्य ।

आधारः – सज्जनवचः ।

परम दयालो भगवन्,

अहं च सुब्रह्मण्य नामधेयः कश्चन अनाथः । भगवान् कारुणिकः उद्धर्ता सौजन्याम्बु निधि-रिति प्राज्ञैः महर्षिभिः अगादि । अहं च बद्धोः कालादपि पीड्यमानः मानसीभिः, भवन्तं आश्रयितुं उद्युक्तः । परन्तु भगवान् कुत्र वसतीति नाहवज्ञासिषम् । 'न वा तत्र चक्षुर्गच्छति' इति श्रुतेः भवान् न दृग्गोचरः । कथं कारं भगवान् उपगम्यः ? इत्यत्रापि न निश्चयमवगाहते धिषणा । लोके उदापं सेवमानाः अपि

प्रयत्ने विघ्नान् भजन्ति अधर्मैः कल्प्यमानान्। शारीरकं मानसं बाधं अनुभवन्ति। तथापि न नृच्यों विरमन्ति। तथैव भवद्दर्शनमपि दुस्साधमिति निश्चितवान्। तथापि भवन्तं दिदृक्षून् न कश्चित् रोद्धुं प्रभवतीति आर्यैरुक्तम्। न च आर्याः अलीकं वदन्ति। मदीया बुद्धिश्च न च इयत्तया निर्धारिता। अतः किङ्कर्तव्यताविमूढ आसम्। दिनेषु गच्छत्सु कश्चन उपायः मनसि द्योतते स्म। दूरस्थान चरान् प्रति वार्ताः प्रेषयितु मिच्छन्तः पुरुषाः वार्ताप्रचारकार्यालयद्वारा (Post.office) लेखाः क्षिपन्ति। तत्रापि गणनापत्रं (Regisrered letrer) यदि प्रेष्यते तर्हि न लेखः नश्यति मार्गमध्ये। केचित् प्रभुसेवकाः प्रभुनामाङ्कितानि गणनीयानि पत्राण्यपि प्रभुनामगुद्रां दत्त्वा स्वीकृत्य पठन्ति। अतः न केनचिदपि उन्घाटनीयं' इति वेष्ठनोपरि (Cover) लेखनीयं इति। अयमुपायः मह्यमरोचत। एतादृशान् लेखान् क्षेप्तं कुत्रास्ति कार्यालयः ?, इति शङ्का जाता। अतोऽयं लेखः पत्रिकायां प्रकटो क्रियमाणः भवद्दृष्टि पथं यास्यति इति निश्चयः कृतः। लोके प्राकृत इव भवानपि सर्वाधिकार्याधिकारी सर्वज्ञः सर्वशक्तिः स्वात्मनैव लोकतन्त्रे नियुक्तः। एतस्मात् हेतोः भवानपि विनोदाय विश्रामाय वा पत्रिकाः पठेत् इति मया अमन्यत। अतः इमं लेखं श्रुणु।

अहेतु प्रदर्श्यमान सौजन्यवार्निधे! अहं च शैशव एव द्वित्रान् आशयान् अभजम्। अष्टमे च वर्षे यानसाधनात् शिरसि आस्फालनं सञ्जातम्। नवमे च पितृनारोग्यहेतोः महत्तया जाता मनसि पीडा। अहं च बालः कुत्र ? महत्तया दृढमनोधार्या पीडा च कुत्र ? तस्या मेव अवस्थायां अहं विद्याभ्यासे मन्दादरः अभवम्। दशमवर्षात् कथञ्चित् विद्यागमः आरब्धः। पितापि निरामयः सञ्जातः। तस्यां वेलायां या बाधा अनुभूता सा पुराकृतकर्मणः फलमिति मन्ये। मम च बन्धवश्चापि विरलाः। विद्यमानाः अपि क्रूराः वञ्चकाः उदरम्भरयः सन्ति। अतो ममता तेभ्यो नागता।

आगतापि वक्रासीत्। ते च एकविंशे वर्षे मामुपासरन्। बन्धवः मयि निरागसि निष्कारणदोषानारोप्य बहुधा मां व्यनिन्दन्। मम चेतः व्यर्थाभिः क्रूराभिः वाग्भिः अकृन्तन्। पुराकृतसुकृतपोतेन कथञ्चित् दुःखसागरः तीर्णः। पुराकृतसुकृतकर्मणः विद्याः मां कथञ्चित् समचरन्। वृत्यभावोऽपि महत्तमां व्यथाम् मनस्यकल्पयत्। न च प्रियैस्सह चरितुं वक्तुं वा अन्यथा वा स्वेच्छा अस्ति। स्वेच्छाभाव एव नरान् अधो नयति। कुतश्चिदपि स्वेच्छा ममताप्रसारौ अबन्धिषाताम्। महत्तया स्वेच्छया अधोगमनं स्वेच्छाभावजातदोषं नातिक्रमति खलु। कथं नु नाम उत्तमानां ममता मयि पतेत्? नापि बालिशममता सेव्या। संस्कारवद्भिः उत्तमैः मेलनं मम कदा जनिष्यते? कियन्तं वा कालं प्रतीक्षिष्ये?

निर्निमित्तदयाबन्धो! सौजन्यसिन्धो! इमं लेखं सम्यक् परिशीलय। लेखेऽस्मिन् कदाचित् भवान् इति कदाचित् त्वमिति च पदे उपयुक्ते। श्रुत्वा भवन्तः मा कुध्यन्तु। मनोऽनवस्थायुतः केन वा प्रकारेण न भाषेत? सर्वव्यापिनं प्रति लेखप्रेषणं हास्यास्पदमिति भावना जाता। सर्वज्ञस्य भगवतः पत्रिकापठनं लोकप्रभुसाम्येन वर्णितं दोषावहं इति जाता भावना यथात्म्यज्ञानाभावात् कृताः भावनाः बालचेष्टाः सहस्व। एकवचनप्रयोगः मामकीनः भवान् इति भावेन कृतः। अपरिचितं प्रति लेखप्रेषणं मा चेतः क्लिश्नातु। मम मनस्यपि भवतः अवस्थानात् परिचित एव। भवति अवचनेऽपि परिचयदार्ढ्याय मयैव भाषणं क्रियते। नातिदीर्घेण लेखेन महायोगिनः कालः मुधा आकृष्यते। लेखमिमं ज्ञात्वा सर्वज्ञः सर्वशक्तिः सर्वव्यापी भवान् मदीयं प्रारब्धं अपमृज्य नूत्नं विरचयतु। भवदाज्ञां च कश्चित् प्रतिबध्नाति खलु। यद्वा यथेच्छसि तथा कुरु। प्रयोजनं अभिलषता मया विरम्यते। मयि भक्ताशयं प्रेरयन् सुखं ददस्व। पुनरुक्तिः क्षन्तव्या। कृतज्ञताभिस्साकम्।

भवत्पादसेवी,
निष्ठल सुब्रह्मण्यः

योजितानि (enclosers)

1. मम मनः। 2. भक्तिः।

इन्द्रस्तुतिः

प्रशस्त इदं कुर्वन् ऋषिभिरवत्वन्वर्थाभिः सहस्राम्बकः अनन्तविभूति समुपबृंहितः प्राच्यङ्गनाधव इन्धाम् । नैकनैष्ठिकमुदीरिताभिः ऋग्भि नुन आस्तां श्रिय ददानः । हरित्परिवृढतासमुपालक्षितोऽपि य आत्मा मनेनेऽघविर्जिधृक्षुनायुगमला भिर्द्रैनोपशमनाभिस्तुरीयाश्थितिजनिभिः सम्भावनाभिरस्तु स मत्पुरो निम्रोचविग्रह उदपनिगाटनान् समग्रं विगृह्णानः ब्रह्मात्मैवयानुभूतिः । अजनिषत पुरस्ताद्यस्य दुग्सानुदाम्नाः लेखाः खां कुं च समाभिव्याप्य पुष्पवत्सुनेत्रौ शिखरिपय परां अच्छाच्छर्षभमल्लिकादामधवलां पारावारसदानवांशुकां सार्वात्म्यभावुको नश्चेतस्यमन्दानन्दधारां वर्षयतु । प्रगेतनस्फुटकुशहारच्छदनरामणीयकता सर्वस्व समाहारकोरं बकाभ्यां भासताम् ।

यो वृत्रमाजघान यं च साक्षादव्ययाचिन्त्यापरिमेय कल्याण गुणानिलयनारायण निश्श्वासरूपा श्रुतिरलङ्कृता सुस्वरेण पुनपुनः स्तुवती समाकर्षणी नवोढेव बाभातितराम् । परारि परुद्वैषमश्च श्वः परश्वश्च यस्य कीर्तिः ज्ञानं च समस्ताविषातां प्रशस्येते पुरा प्रणूयेते स मेऽज्ञानं व्यपोह्य स्तृणातु मां शक्त्यैकवीरः ।

घृताच्यम्भोजिनीयमिन्द्रभानुमवृणीत, तिलोत्तमाममत्तविलासिन्युत्तमा येन दुःखाम्बुधिं तरीता, यो भावयाम्बभूव पुरा जनिषु सतां वर्त्मनि, इदिधद्य ईह्याधिके विन्नन् मौनिनः, योः रम्भाहृत्कुमुदग्लो शचाशुचिभावपयोज सहस्रभानुस्सहस्राक्षस्सहस्रपदाभिव्यञ्जितः, सहस्रारपारे मनीषाऽलिप्तस्सुखितः श्रुत्यवतंसितः बृहद्गिरां पत्युरन्तेवासी, यश्चाशश्राविद्वृत्रोन्मूलेन, श्रीमातृवरिवस्यासादिव्यपदवं बाभांस्तर्पिता तर्प्ता अप्तेति, नेदिष्ठस्य सम्पत्स्यत इति च द्रढिष्ठा मामकीना धिषणा ।

महन्ज्ञानविद्योतिनी द्योततां मामके मानसे वज्रपाणे नमांस्यर्बुदानि प्रभान्त्युज्ज्वलान्यम्बुजानीव लोकावनायत्त मह्यं शिवं स्तात् ॥

अग्निस्तवः

श्लो॥ अग्निमीळे महज्ज्वालं नित्यपूतं द्युसन्मुखम् ।
मेष रूढं गृहस्थानां निदानं कर्मणां शुभम् ॥

यमवर्णनचम्पूः

अथैवं स्तुवीमः—

श्लो॥ सहस्रदलपङ्कजस्फुटनकर्मपारङ्गतः
विलोलमदबम्भरस्फुरितकेशपाशां मृदुम् ।
विहासयति पद्मिनीं य इह लोचनं चक्रिणः
स यस्य जनकः स्मृतः करुणया दृशा रक्षतात् ॥

जगज्जक्षुषः शास्त्रार्थदृशं योऽलभत स पातु नो महिषारूढः । नील ञ्जनसन्तमस व र्षुक भ्रंदीवरमसणताकान्त्यनुसन्धितवपुरमनुष्य दीनस्य दीर्घमायुर्विदिशतात् । नैकविध भ लनिदाघसन्तापितः शुष्कबीजतर्षः सुखलेशशीकरात्यन्ताऽभावानुयोगी दैवमातृकः केदारोऽयं दीनडिम्भः । विपदामभावं विदधत्सहस्रधः प्रत्युत्पन्नधिषणः त्वं हि वंहीयोदग्घटीयन्त्रण सम्पत्सारं करुणासारं विधध्या इति याचमानं मोमोग्वु चेत इदं गरीयः ।

एनःपुञ्जमिव समध्यतिष्ठन्महिषं निंरहा अहन्ताविहन्ता च हन्तृत्वमाति-ष्ठमानोऽप्यहन्ता मुधा क्षुद्रयूकं कणेहत्य वक्ता कदाप्यञ्जसा नैव यो ज्ञानदृष्टि-र्महात्माऽनुकम्पामद ण्णो गरीयांसमंहस्समूहं निकृन्तन्महत्याकृतिर्धर्मसारस्य पाया दपायादनन्तां श्रियं दीर्घमायुर्दिशत्वम्बुजाक्षः

यश्च खलु कालनियामकस्य जगच्चक्षुषः प्राणः जगत्प्राणः शुचिः जिष्णुः पुण्यजनः प्रचेताः श्रीवसख ईशश्श्राद्धदेवो राजमुखो राड्राजताम् आस्माकीने हृदयारविन्दे ।

श्लो॥ नाचिकेताय योऽदत्त ब्रह्मविद्यां तितिक्षवे।
मृत्यो रहस्यमाभिन्दन् स पायान्नारकाधिपः॥

ग्रहराजस्य शनैश्चरस्य सगर्भ्यः ऊर्जद्वितीयायां प्रीत्यनुयोगी योगी यो गीर्भिरभिनन्दितः भोजितश्च यो यमो यमुनया, यस्य कृते दीपदानं समाचरन्ति सुकृतिनः, गाढां रीढां विधुन्वन्नवतु गुरुयशाः रीढधर्मो विभातु। फुल्लाम्बुजापघनस्सुजघनः सनियमस्सयमस्स यमः यमयतु मां धर्मानभिज्ञं कर्मसु विमलेषु पितृपतिर्दक्षिणाशामहीशः पित्रा दापत्वनुग्रहमनवग्रहम्। तस्मै नमस्यांबुजानां ततिर्भूयसी स्ताज्जनावे। सावित्र्याऽवित्र्या समनुगृहीतः सावित्रीमुपलालयामास बरदानेन यः करुणार्णवः, यस्सत्यनिष्ठः सत्यवन्तं सत्त्वन्तमजीवयत्सत्त्वहितानुकाङ्क्षी, योधर्मं ग धर्मबुध्या समातिष्ठिपद्धर्ममार्गे, यस्स्वयं मौनिशापमुररीकुर्वन्नवततार विदुराकृतिः, योऽनलसखो नलं नरं, भीमाकृतिर्भीममनुजग्राह सृष्टिस्थितिलयरहस्यपण्डितः, यं तिलतर्पणैः गार्हस्थ्येन आश्रमिणः प्रीणयन्ति, यश्श्राद्धानः तृप्यति, यश्च स्मृतिमबध्नात्, कर्मानुरूपेणागस्कृत शिक्षयति स नो मृत्युभीतिं विधुन्वन्नवत्वपारवार्यश्रियं बिनन्वानः। त्वामेव औपनिषदं हिरण्यश्मश्रु पुरुष वनमालाविभूषितं परमं पुरुषं पृच्छामि तं मे दर्शय।

श्लो॥ समवर्ती समवर्तनं दिशतु मे कालस्वरूपश्शुभः
सुरलोकाधिपनीलनीलतनुभाविद्योतिताशाततिः।
अनुकम्पासुतरङ्गदृग्धवतु नो ब्रह्मण्यचूडामणिः
बिगद दण्डधरस्तनोतु महतीं तृप्तिं प्रदत्तां पुनः॥

नैर्ऋतिस्तोत्रम्

श्लो॥ गृहस्था: दिशियस्यैते सायम्प्रातर्जितेन्द्रिया: ।
वलिं विदधते पूजासमाप्तावचतांच्चिरम ॥

वरुणनुति:

श्लो॥ प्रतीचीनपुर्यां विराजन् स पाशी
इह्निग्गुलन्जिंकि रुदन्तमेनम् ।
दधानोऽम्मयीं मूर्तिमव्याहताज्ञः
भवलालतिकालसितोऽवतु नः ॥ १

यः कृष्णं ब्रह्म परमं मत्वा हृदि विभावयन् ।
मृत सान्दीपतनयं दत्ते स्म परिपातु नः ॥ २

वारुण्याशाधिपः पातु शिवीतनुविभासकः ।
पाशी वशीकृताराविरस्तु नस्तुष्टिदस्सदा ॥ ३

नलस्य मानसीं शुद्धिमभ्यूहितुमगात्पुरा ।
स्वयंवरं यो मतिमान् दत्तां पाशी स्वयं वरम् ॥ ४

वायुप्रशंसा

यस्यांशा: तन्वां भान्ति सप्तस्कन्धात्मकश्च यः ।
अविश्रान्तस्सदा वाति यो जगत्प्राण ईरितः ॥
योगिनो हि विचिन्वन्ता यं वशीकर्तुमुत्सुका: ।
योऽजीजनज्ज्ञानकीशभक्तं स तनुतां शिवम् ॥

कुबेरप्रणतिः

सस्तुयमानो मनुजैर्मनुष्यधर्मा ।
स मुद्यन्तं कर्मसु रक्षतात्सुकर्मा ॥

यज्ञपरिवृतो विभातु मङ्गलास्यः ।
यः क्षपयामास निस्स्वतां प्रशस्यः ॥

विश्रवस्सन्ध्यातः स्फुरतु वैश्रवणः
सुश्रवसाञ्चितः धनी शुभश्रवणः ॥

बृहत्याभिनुतो देयात्सम्पदस्सम्पदम् ।
महत्याश्मगर्भश्रिया युतः विपदो विपदम् ॥

विधिवर्धितचिच्छ्रीः पातु शिवसखः ।
निधिचरोऽस्तु सुखाय नो भद्रमुखः ॥

ईशवन्दनम्

ऐशान्याशाविभुश्शम्भुः व्योमकेशांशको मरुत् ।
सना विभातु मत्स्वान्ते विना यं न सुखं लभे ।

नक्षत्रप्रमाणः

नासत्यप्रमुखाः भेशाः घ्नन्तु नेत्रादिपीडनम् ।
दिव्यां दृष्टिं प्रदेयासुः भद्राणि च वितन्वताम् ॥

उपग्रहनुतिः

१ भावविप्लवकर्तारं कालं ब्रध्नांशजङ्ग्रहम् ।
कण्ठेकालस्मृतिं वन्दे देवं कालस्य सूचकम् ॥

२ मुदो बधान परिधिं परिधे भावनाशक ।
काराजलव्यथां भिन्दि शुभ्रांशुवंशविभासित ॥

३ यज्ञधूममहापीत धूमधूमध्वजाकृते ।
धूममार्गपरिश्रान्तं रक्षाग्निभयनुत्प्रभो ।

४ अर्धप्रहार शुभद बिन्द्वाधिक्यगृहस्थित ।
विदश्च धीमन् धिषणां पूतां सुमिशितां कुरु ॥

५ उपग्रहेषु सर्वेषु भवानेव महान् शुभः ।
गुर्वंशज धनं देहि पुत्रान् बुद्धिञ्च वैदुषीम् ॥

६ कोदण्ड त्वदते श्रीमान् को दण्डयति ? कुत्सितान् ?
रुष्टोपरिष्टात्पतन ददास्यवसि संस्तुतः ॥

७ विधुन्तुदांश हृष्टात्मन् पातपातः सुखावह ।
महालौक्तिकतावक्रधिषणेभ्यः पुनीहि माम् ॥

८ आयुस्स्थानस्थितो लाभाननेकान् दातुमर्हसि ।
निष्प्रत्यूहञ्च वाणिज्यं देहि केतो ध्वजांशज ॥

९ वन्दे यमात्मजं खेटं गुळिकम्प्रेतवासनम् ।
चक्रीवतस्सूकराणां मलागारस्य च प्रभुम् ॥

१० कालात्मजं शनेर्दत्तपुत्रं मान्दिमुपास्महे ।
दयामयि महाभाग रक्ष जन्मनि जन्मनि ॥

విరిదండ

1 ఉచితానుచిత వివేక
ప్రచురమతిన్ వ్యవహరించఁ బ్రాకృతునైనన్
రచితకృపఁ బ్రోతువని వే
దచయంబులు దెల్పుచుండు దన్త్యవనాగ్ర్యా.

2 ప్రామినుకు లన్ని చేరియు
నేమని కీర్తింపనేర్చు నేకజ్ఞానిన్
వామాంగమా శరీరా
ప్రామాణ్యపు నెఱుకఁ జూపు పంకజనాభా.

3 వివిధాభిలాషదిత్సా
దివిషద్వర్గంబులెల్లఁ ద్రిషడాయస్థుల్
భవదంఘ్రి నీరజాతమె
భవదంబేకత్వదాయి పావననామా.

4 దృక్తతి శ్రీసతిమోవిని
నక్తంచరగతినిఁ జేర నాళీకాస్యా
ప్రాక్తనగుణవిల్లక్ష్మీ
ముక్తాతతి దృష్టిబట్టి మూకన్ జేసెన్.

5 తిలతైలంబును వేసి దీపకలికల్ దీపింపగాఁ జేసి కో
నెలలందున్ మనముల్లసిల్ల నియతిన్ వెంకన్న సేవించు భ
క్తులకున్ దంగెటిజున్నుగాదె రిపుసంగోచైకభానుండు నా
యులసత్వంబును బాపిఁగాచుత కృపన్నవ్యాజబాంధవ్యుఁడై.

6 శ్రీనివాస పాదచింతసేయుటమాని
పలువమాటలెన్నొ పలికినాడ
విషయవాంఛఁజిక్కి వెంగలినై వాత
బొబ్బరించె మనము భోగిశయన.

7 తవపాదద్వయమేవ నోగతిరహో త్వం రక్షయంచున్ బుధుల్
హవనాది క్రియలుజ్జగించి భవరుగ్వైద్యైకసామతిన్
అవనీకాంతుడ! నిన్నుఁజేతి హృదయంబవ్యాకృతిన్నిల్పి మో
క్షవనీహంసులు రాజిలంగ నిక దీక్షన్గాందు మోహార్థినై.

8 నిరవద్య గుణాధిక నే
నిరతమునే భక్తిగొల్తు నిశ్చల బుద్ధిన్
పరదైవంబుల పదముఁ
గరుణన్ గైకొనుము నీవు కవితాభిజ్ఞా.

शुकालापः

तस्मिंश्च नन्दनोद्याने एकत्र वसन्तः, अन्यत्र ग्रीष्मः इतरत्र प्रावृट् एवं क्रमेण ऋतवस्सर्वो प्रतिभान्ति, तत्र कल्पकवाक्यालं वसन्तो यथा—

— वसन्तः —

१ वसन्तोऽयमनन्यश्रीः सार्थकत्वं ददातु नः ।
भूयाद्वैयर्थ्यं मनूजोः घर्मो देदीप्यतां पुनः ॥

२ अभद्रन्द्रावयन्नेषः तन्द्रां नो हरतात्द्रुतम् ।
कल्पिषीष्ट शुभ वृत्तीः याभ्यश्शमिह लप्स्यते ॥

३ मदयुतमधुपेन त्राजिता माधवीयम्
तनुतरमपि धूळिं बिभ्रती पौष्पमङ्गे ।
वदति पिकमुखेन श्रीः ह्रियामेति मन्दं
रसिक जन मनोज्ञा विभ्रमानावहन्ती ॥

४ आस्फालितं पञ्चशरेण चापं पिकेन संगवित मञ्जसा च ।
वसन्तलक्ष्म्या कृत एव हासः सञ्चूर्णितं धैर्यमिहोत्सुकानाम् ॥

५ रजोमयश्चुम्बति पद्मिनीमळिः वनप्रियो रौति मनांसि रञ्जयन् ।
श्रिता लता भावनिपीडिता तरुं स्मरस्य राज्ञो मतमाश्रितं जनैः ॥

६ सर्वतोमुखतया कुसुमेषुः लक्ष्यते परवशीकृत पान्थैः ।
यद्वनानि विकचानि समन्तात् षट्पदोच्चलित पत्रयुतानि ॥

७ षट्पदव्रजकैश्येन रजः पटलावासता ।
पुष्पस्तबकवक्षोजा लता नववधूरिव ॥

८ पिकस्स्वगातिकोभाति भुञ्जानश्चूतपल्लवान्
माकन्दतरु संसेवी मधुरैः कूजितैर्मधौ ॥

९ चैत्रागमनहृष्टायाः सञ्चरन्त्या ऋतुश्रियः ।
मञ्जीर शिञ्जितं मन्ये ध्वनिं बम्भरनिर्मितम् ॥

१० आसां समानां ददतां दिनानि मतिमुज्ज्वलाम् ।
यथास्वाद्भगवान् ख्यातः सौजन्यादि गुणाकरः ॥

सन्तानवाटिकयां एवं ग्रीष्मः

१ रुचिवारि समाकृष्टा सायन्तननभस्वति ।
मत्तालिरपि नो मञ्जु पङ्कजे लग्नतामगात् ॥

२ स्वर्णच्छायं जगत्कर्तुं अणून् तेजोमयान् द्रुतम् ।
सर्वत्र सञ्चरन् धीरः प्रक्षिपत्यब्जबान्धवः ॥

३ उष्णांशुनिकटे हन्त पद्मिनी म्लानपङ्कजा ।
चैतन्यमपि लोकानां दिवा हन्त विकर्षितम् ॥

४ सप्ताश्वकिरणैस्तप्ता धरणिर्बाष्पसन्ततिम् ।
मुञ्चती क्रन्दनं कर्त्री कटुभिः पक्षिणां रवैः ॥

५ सरस्सु न पयोदृष्टं न दृष्टाः पक्षिणस्तरौ ।
वीथ्यां गृहेषु नो दृष्टः व्यजनेन विना पुमान् ॥

हरिचन्दनवाटथां प्रावृट् एवम्

१ तमालनीलं प्रतिगर्जदम्बरं सौधामनीं खड्गलतां वसम्बरत् ।
मुहुर्मुहुः पान्थगणैर्विलोकितं विभर्ति योधौघसमत्वमद्भुतम् ॥

२ ग्रीष्मोष्मतप्तं सुरवर्त्म नूनं शचैश्शनैर्मुञ्चति वारिबिन्दून् ।
नभस्वदालिङ्गितसत्कृतंहा धाराः सृजद्भन्त पुनारुरोद ॥

३ कुत्रावनिः ? कुत्रनभो ? विदिङ्नु ? शकुन्तराजः, कनु सुञ्चरन्ती ।
थिदा न दृष्टा जगताणुरूपा सृष्टेः पुरावारि जनै रमानि ॥

४ मन्दान्धकारे दिशमाप्नुवाने वनेषु सिक्तेषु जलैर्मुगेषु ।
जन्त्वौघ चेतोदळनादिवास्ते कल्हाररराजी रुधिरस्य धारा ॥

५ इतःपरं नो धरणिर्विलोक्यते न पञ्चभूतानि जलं हि केवलम् ।
नदीभिरित्थं हृदये विनिश्चितं द्रुतं रुदन्त्यः प्रचलन्ति वारिधिम् ॥

मन्दारवाटिकायामेवं शरत्

१ सौन्दर्यं नभसो द्रष्टुं स्फुटपङ्कजलोचना ।
स्रोतस्विनी समुत्कण्ठा राजते ध्वनिभासुरा ॥

२ सिताम्भोजनिषण्णेयं शारदीश्रीर्विराजते ।
राजद्राजमुखाऽम्भोदवसना जनकर्षिणी ॥

३ अधवा न पङ्कसम्मृष्टः सस्यं चक्षुर्मनोहरम् ।
समप्रमाणौ रजनीवासरौ जनसंस्तुतौ ॥

पारिजातवाटयामेवं हेमन्तः

१ स्पर्शालुना हन्त हिमाद्रिणां हरि दिवं भुवं स्मात्मतया परीप्सया ।
अकारि लोको मिहिकासमावृतः मोघीकृतांशुस्तपनो विलज्जितः ॥

२ हेमन्तस्य यशोराजिः तुषारच्छद्मना बभौ ।
सिताम्भोजमिवाभाति हिमं वायुधृतं महत् ॥

३ सकुङ्कुमक्षोदकुचा रमण्यः निगूहमाना मिहिकानिलाद्धि ।
चरन्ति सौधान्तरमाभजन्त्यः कदुष्णवस्तूनि समाहरन्त्यः ॥

कदम्बवनवाटयामेवं शिशिरः

१ हैमनानिलनिष्कासात् नृणां सञ्चारमाददौ ।
पल्लवान् विसृजन्नेष दोपानिव विभासते ॥

२ निर्जित्य हिमसङ्घातं रविमस्थापयत्पुनः ।
तुषारकणिकास्सर्वाः अन्तरिक्षान्ममार्ज ह ॥

कालस्वरूपेच नवर्तुपूर्णे
सम्फुल्ल नानाकुसुमैर्विराजि ।
संल्लाप एवं चरति प्रमोदी
वर्गे शुकानां नवताविभासी ॥

तत्र वने एकत्र शाखाया मुपविष्टा शुकी एवं वदति—

स्त्रीविद्या

१ विद्या विज्ञानदात्रीहि हृत्तमोवारणेपटुः ।
विद्यया रहितो मर्त्यः शोभते नो बकोयथा ॥

२ संस्कार रहितावाणी न च कास्ति कदाचन ।
संस्काराज्जन्म सफलं दिव्यया सहि लभ्यते ॥

३ गुणिनां गुणहीनानां विद्यया लक्ष्यते भिदा ।
स्त्रीणामपि हि सद्विद्या बुधैरावश्यकी कृता ॥

४ पुरागार्ग्यादिवनिताः सर्वशास्त्रार्थ कोविदाः ।
महाद्भिस्सहचराश्च व्यदधुस्सर्वमङ्गलाः ॥

५ वनिताभ्यश्शास्त्र विद्याः बोधनीयः प्रयत्नतः ।
घशीलास्सुत्त्वसम्पन्नाः मा निन्द्यन्तां बुधोत्तमाः ॥

तदेतन्निशम्य अन्यः कीरः स्वभानेवमाह—

१ सर्वजीवेषु भगवानेक एव व्यवस्थितः ।
सत्त्वोत्कर्षेण सन्दृश्यः वरै स्सूक्ष्म दृशांखलु ॥

२ न जानेषु मिथोभेदः स्थितयां गुणसम्पदि ।
एकएव तनोर्धर्मः न सृष्टो विधनेऽगुणः ॥

३ गुणानपि तिरस्कृत्य अस्पृश्य इति चिन्तया ।
न्यैङ्क्षैर्बन्धु जनैर्युक्ताः ये स्थितान्ते हि बालिशाः ॥

४ मनोधर्मं व्यप श्रित्य सङ्कुचन्तीं धियं श्रिताः ।
न बहिर्धर्ममात्रेण सुजनं त्यक्तुमर्हथ ॥

५ सङ्कोच भावनाचैक्यं निरुन्धे धर्मविप्लवम् ।
अतस्सौभ्रात्रभावेन वर्तध्वं समतायुजः ॥

एवं उक्त्वा अन्यं शुक मपृच्छत् । दीनसमुद्धरणं प्रति किमभिप्रैषि ? इति । स एवं कथयति—

दीनसमुद्धरणम्

१ ये जनाः वञ्चिताः क्रूरैः बाधिता निहतश्रियः ।
तानद्रियेरन् विबुधाः समाहृत्तु समां धियम् ॥

२ वचनेषु हि सिद्धान्तः सर्वेणापि निगद्यते ।
सर्वे सिद्धांन्तवसनाः सन्तिसङ्घद्रुहः परे ॥

३ तानभिद्राव्यसुसनाः ऋजून् दीनान् प्ररक्षत ।
कीर्तिरेव पराक्रान्ता जगद्रङ्ग सुनर्तकी ॥

अन्यः शुकः बाल्यविवाह मधिकृत्य वक्तुकाम एव माह—

१ देशकालानुसारेण धर्माः कथ्यन्त उत्तमैः ।
अतः स्मृतीनां भिन्नत्वं नैको धर्मो निरुच्यते ॥

२ दम्पत्योः बालयोः पाणिग्रहणं प्राग्व्यधीयत ।
अवस्थिकालस्तं धर्मं स नाद्याचर्यते बुधैः ॥

३ युवानौ दम्पती विद्यावन्तौ सङ्घर्षक्षकौ।
मिथो विवाहबन्धेन युज्येयन्तां मनीषिणौ ॥

४ विद्याविनयसम्पन्ना गृहकर्मपरा भवेत् ।
गृहदायैवोरकुरुते कृत्वा विद्यावतस्सुतान् ॥

५ यदि दुर्दैवतः काले प्रतिकूले स्फुरन्मतिः ।
आत्मान माश्रितांश्चापि पोषयित्री विराजताम् ॥

६ कलासु कुशला साध्वी पत्यौ देशान्तरे स्थिते ।
एकाकिन्यपि कृच्छ्रेषु कलया रमते बुधा ॥

७ दमयन्त्यादि वनिताः युवतीत्व विभूषिताः ।
क्षत्रकान्ताः पुरापाणिग्रहणं बहुमन्वत ॥

८ कलावती पद्मजा शास्त्रार्थं द्रुपरिनिष्ठिता ।
भर्तृनुद्बोधयामास सैरन्ध्रीत्वविभूषिता ।

९ कलाशास्त्रार्थविज्ञानात् बहुं रायं समश्नुताम् ।
महद्धर्षं समाकीर्णे जीवेज्जगति निश्चला ॥

अत्रान्तरे सहगमनं प्रति किं ब्रूयाः इति पृष्ठा काचन शुकी एवं वक्ति—

१ पत्या तन्वीं क्षिपन्त्यग्नौ स्वयञ्च म्रियते क्वचित् ।
एतद्द्वयं कलावस्मिन् न चोरीक्रियतां बुधैः ॥

२ तारा मन्दोदरी शुद्धाह्युत्तराऽनङ्ग कामिनी ।
जीवन्त्यः कीर्तिममन् मृतेष्वपि हि भर्तृषु ॥

३ कर्तव्यं सम्यगालोच्य ज्ञानं संसारपद्धतिम् ।
जीवन्त्येव महाप्राज्ञाः क्रियाः कुर्वीत सम्मताः ॥

४ साध्वा भर्तानुगम्यःस्यात् भावेनेति विनिश्चिनु ।
भर्तैव कामो नश्यःस्यात् जं वेद्धमांचरण निष्ठिता ॥

अन्येशुकाः, केचिद्विद्यार्थिनः राजकीय व्यवहारं प्रविशन्ति । तत्र कस्तेः भिप्रायः ? इति शुकपोतकमपृच्छन् । तदा शनैः स्मितवदनः शुकपोतऽ लमेत्य एवं वक्तुमुपक्रामत्—

१ विद्यां विहाय विद्यर्थी नविशेद्राजमण्डलम् ।
स्वयं विज्ञानरहितः कथं तत्त्वं विनिर्णयेत् ?

२ उत्साहः कार्यशक्तिश्च विद्यासक्तिः स्थिरामतिः ।
अन्तेवासिमनस्येते वर्तेरन् सत्प्रवर्तनम् ॥

३ उद्रेकमेषां संवीक्ष्य योज्ञियन्ति स्वकर्मणे ।
राजकीयाः जनाः केचित् मुख्यास्तेषु व कर्मठः ॥

४ राजकीयसमाकीर्णं भाववागुरया सुधीः ।
न गृह्येत परित्यज्य विद्यां नष्टद्वयो भवेत् ॥

५ अन्तेवासिषु भ्रष्टेषु सर्वं नश्यति पालनम् ।
तेऽप्यर्थरहितोद्वेगं भजेरन्नाविकत्थनाः ॥

६ शिष्याः विज्ञानरहिताः भूत्वा वृत्ति लमश्रिताः ।
भैषज्यं यन्त्रकर्मापि चरेयुः पालनं कथम् ॥

ततः विवाहे शुल्कग्रहणमुचितं वेति सन्दिहाने कस्मिंश्चिच्छुके अन्यः एवं स्वमनसि द्योतमानं प्रकटयति—

प्रतिष्ठितो विवाहः स्यात् मिलिते यदि चेतसी।
शवम हृत्योपयमः कुतश्शारीरको भवेत् ॥ १

कथं न लज्जेत पुमान् पीडयित्व पि बान्धवान्।
लब्धराः क्रीतएव स्यात् चेतश्शापेन धक्ष्यते ॥ २

पितरो दीनमनसः कुमार्यस्त्यक्तकामनाः।
पुत्रीपरिणयं कर्तुमशक्ताः कृच्छ्रमासते ॥ ३

अत्रान्तरे वृद्धः शुकः "आर्थव्यवस्थायामेव भ्रष्टायां सन्तानविषये किं कर्तव्यम्?
इति पृष्ठः कथयति एवम्—

उत्पत्स्यमानसंरोधः सर्वथा युज्यते बुधैः।
इदमेव कुटुम्बस्य यन्त्रणं परिकीर्तितम् ॥ १

उत्पादित शिशूपेक्षा द्रव्याभवादि हेतुभिः।
कथञ्चिदपि नो युक्ता कुतः स्यात्कारणं नरः ? २

यदि कश्चिन्महाभक्तः त्यक्तसर्वभरश्शिवे।
तं परित्यज्य सुजनाः यतध्वं यन्त्रणे द्रुतम् ॥ ३

प्राज्ञोऽहणन्निन्द्रियाणि तिथिनक्षत्रचिन्तया।
संयम्येन्द्रियजालानि वर्तनं श्रेष्ठमुच्यते ॥ ४

ततः सर्वे शुकाः मिळित्वा एवं गानं कुर्वन्ति—

भिन्नत्वमुमगच्छद्व दृश्यमानं पयश्चयम्।
यथा याथार्थ्यतोह्येकं तद्वन्नः संस्कृतिश्शुभा ॥ १

२ यथात्मा बहुभिर्मर्त्यैः यथा खं वस्तुभिर्भिदाम् ।।
नोपगच्छति तद्वन्नः संस्कृती राजतेतराम् ।।

३ यतयोनैकदेशीया: कवयो मानिनस्तथा ।
कथङ्कारं न नम्यन्ते मनुष्यैर्गुण शंसिभिः ।।

४ स्नातैश्शास्त्राम्भसि बुधैः भाषाभेदमुपागतैः ।
अर्चित श्शितिकण्ठः स्यात् भेदः क्वोन्वस्ति रक्षितुः ।।

५ वस्तून्यङ्गानि सर्वाणि यथा नारायणस्य वै ।
भाषा देशाः देवगृहाः तद्वदङ्गानि संस्कृतेः ।।

६ निषेव्यतामैक्य मरालवां विना
जिजीविषा स्थास्यति यद्विना न वै ।
अभाजि जीवातु रिवोत्तमैर्बुधैः
स एष पन्थाः श्रयतां शुभेप्सुभिः ।।

।। इति शुकालाप प्रकरणम् ।।

नन्दनाशोकम्

तत्र नन्दनोद्याने कोकिलाः अभिनयं कुर्वन्ति । स च यथा—

नन्दी

क्रन्दन्तीं भुवमाकलय्य रभसात् सन्त्रस्तचित्तेन च
स्वावज्ञावशतः क्षणं गणयता धर्मात्मना धीमता ।
अम्भोधावसुरं निहत्य रुचिरं कामं वपुर्बिभ्रता
येनारक्ष्यत भूरनङ्गनिहता दद्यादहिंसां स वः ॥ १

अपि च—

त्यक्त्वा सीताम्प्रियां स्वां विधिबलवशगो वीरता बद्धबुद्धिः
उत्साहाद्वर्धमानः यशसि सति धिया दूरमाकृष्ट चेताः ।
हत्वायुद्धे रिपुंयः जनकनृपसुताऽथोगसन्तापितात्मा
पश्चात्तापं च भेजे कपिवरसखितावाप्ततोषोऽवताद्वः ॥ २

(नान्द्यन्ते सूत्रधारः)

प्रविश्य

सूत्रधारः - अलमतिसंरम्भेण । आज्ञप्तोऽहं राज्ञा विज्ञानसमुपार्जनात्यक्त सर्वसम्पदां अलौकिकरसानुभूतिरेव मुख्यतो मा प्रपञ्चेऽस्मिन् इति मन्यमामानां मनांसि हृदयशशधरमणिसन्द्रवीकरणपटुना हिमयूखेन काव्येन रञ्जयन्त्विवति । अद्य खलु चण्डांशुकिरणैरिव ग्रीष्मे, नातिसरलाभिः अरसाभिः कविताभिः तापमाप्तवती भूमिरियम् । चिक्लिन्दिरे सहृदयाः एतत्तापापनोदनक्षमेण नन्दनाशोकनाम्ना रूपकेण मोदयामि खलु सहृदयान् । तदिदं रूपकं उत्सृष्टिकाङ्कमिति कथ्यतेकैश्चित् ।

सुब्रह्मण्यः कविर्भाति निष्कलान्वयसम्भवः ।
सन्यासिशर्मणः पुत्रः कृतवान् रूपकन्त्विदम् ॥ ३

भवतु नटीमाहूय सङ्गीतकमनुतिष्ठामि । (नेपथ्याभिमुखमवलोक्य)

आर्ये, इतस्तावदागम्यत म् ।

(ततः प्रविशति नटी)

नटी : आर्य, इयमस्मि ।

सू : श्रुतं वा मयोक्तं सामाजिकान् प्रति ?

न : आर्य, श्रुतम् । किन्तु कविरेषः एकेनविंशे वत्सरे कृतवानिदं काव्यम् । तत्र तत्र रसहीनता जायेतेति सन्देग्धि चेतः ।

सू : अयि, भाविमार्गानाकलन श्रुसृत कठिन वाक्ये ।

न : अये नाथ ! निन्दितवत्यहं तम् । सर्वथा क्षन्तव्याहम् । लज्जे, क्लिन्देच ।

सू : अहो !

भाविकर्मसमालोच्य वक्तव्य महतोज्ज्वलम् ।
अन्यथाऽनन्ततापस्य चाधारो हि भविष्यति ॥ ४

भवतु, कलिरप्येव मुक्तवान्—

सन्तो निन्दन्तु शंसन्तु नाहं किञ्चिदपि ब्रुवे ।
यतो विज्ञाय दोषांश्च सुदूगुणानानयने यते ॥ ५

अथावां ग्रीष्मर्तुमधिकृत्य गायावः ।

मध्याह्ने पक्षिणस्तप्ताः सरोजदळसंस्थिताः ।
सुखं तत्राप्यलब्ध्वा ते भ्रमाद्गच्छन्ति वेतसम् ॥ ६

नटी : जन्तुभिः कदळीपत्राण्यश्रयन्त हि सत्वरम् ।
क्षणे शाखान्तरोद्भिन्नचण्डांशुग्लपिता वने ॥

सू : वायसाः नीडमुत्सृज्य जलोष्णत्वदुता वने ।
कुर्वन्ति नळिनीपत्र सच्छादित शरीरिणः ॥

न : सङ्घस्तमालवृक्षाणां कोकिलैराश्रितो वने ।
जन्तूनां हृदये शोकः मूर्तिमानिव राजते ॥

सू : मयूरा दीर्घनिश्वास सङ्कुचन्नेत्र संयुताः ।
सरूपं भानुजंशोकं कण्ठे नैरयेन बिभ्रति ॥

न : गात्रे संस्थाप्य पद्मानि कान्ता भूमावलुण्ठिषुः ।
पुनः पुनः खिद्यमाननेत्रदर्शित साध्वसाः ॥

सू : अपि च, पश्य प्रिये, सूर्यातपे अशोकवृक्षः तापितान्तर्बाह्यः निश्चल स्तपति । तथापि—

प्रभावान्मित्रस्य प्रशमितधिया याचति सुखम्
अहो तापाक्रान्तः पुनरिह सुखी सम्भवति वा ।
नरो दिष्ट्या योगं भजति सुखद वा विषमदम्
अशोको नाम्नैव ह्यभजदिह शोकेन विकलः ॥

(नेपथ्ये)

आः परिभूतोऽस्मि । सत्यमुक्तं भवता । 'प्रभावादि' ति पुनः पठति ॥

सू : किमिदं सञ्जातम् ! (विचिन्त्य) आं । ज्ञातम् । अये तव भ्राता गृहीताशोकवेषः मत्पठितं श्लोकमन्यथा गृहीत्वा आत्मानं निन्दति । तदेहि आवा मप्यनन्तरकरणाय सज्जीभवावः (इति निष्क्रान्ते)

(तत्रश्चन्द्रिकाधवळसौधमार्गादवतरन् दुःखितहृदयः अशोकचक्रवर्ती प्रविशति)

अशोकः - श्रुतिर्यज्ञे हिंसां न वदति जगत्क्षेमकरणात्
प्रजानां रक्षायै न हि नमितवान् चापममतिः ।

ममोग्रात्कार्याद्भूररुददिति तापाकुलितहृत् ।
अहिंसायास्तत्त्वं ह्यविदितवतो जन्मविफलम् ॥

मया युद्धे ध्वस्ताः अकरुणहृदा हन्तरिपवः
कृताः व्यङ्गाः केचित् चरणरहिताः बाहुविकलाः ।
रुदन्तीभिस्तारं शकुनिवनिताः कम्पितहृदः
समं मुञ्चन्त्यश्रु स्फुटति हृदयो मे शिव शिव ॥ १४

बाहुनालिङ्गिताः कान्ताः येन स्पृष्टौ कुचौ स्त्रियः ।
सोऽहन्यत मया जन्ये नृशंसा व्याप्तचेतसा ॥ १५

(इति बाष्पाण्यत्यज्यन्त राज्ञा)

यत्कान्तास्तनकाठिन्य बाहुपाशाभिताडने ।
आलम्बनमभूद्वक्षः तदभिद्यत चासिना ॥ १६

अनालोच्य युद्धोन्मादिना मया रणे अनेके विगतप्राणाः कृताः शान्तेर्वीरता नचाधिका इत्यनुभवतो ज्ञातम् ।

अहो रणेन भीमेन मनोऽथ परितप्यते ।
घातुकस्य कुतश्शान्तिः मे कारुण्य विभेदिनः ॥ १७

अहो दळति हृदयं मे शतधा (इति स्तम्भीभवति)

लप्स्येत वा मयाऽहिंसा कृत दुष्कृतनाशिनी ।
न युद्धोन्मादिनोव्यर्थं न साम्राज्य पदं लघु ॥ (इति रोमाञ्चितो भवति)

कळिङ्ग युद्धसन्तप्ते हृदि राज्यं न सौख्यदम् ।
त्यजामि सार्वभौमत्वं करुणायुतमानसः ॥ १९

(ततः प्रविशतः वैताळिकौ जयभद्र वसुपाणिनामानौ)

जयभद्रः - राजन् कोपारुणाक्षिभ्रमणरिपु मनस्स्तम्भिनी गूढभावा
वृत्तिर्जेयीयते ते युधि रचितमहच्छौर्यविच्छिन्न शत्रुः ।

खड्गे हस्ते यदा सम्भ्रमति रिपुगणोनेत्रयुग्मं निमील्य
विम्बोष्ठ्याः स्वप्रियायाः स्मरति रतिमदाविष्टवैवश्यभाजः॥ २०

वसुपाणिः ? अमावास्या इवाभान्ति रिपुक्षोणीभृदङ्गनाः।
भास्वतस्ते दयादृष्टी रलब्ध्वा स्वक्षपाकराः॥ २१

(राज्ञो विकलत्वां दृष्ट्वा तूष्णीं निवृत्तौ)

अशोकः - अहो अनुकम्पाविहीनस्य कृतपापस्य दुर्मतेः मानवजीवनोद्धरणाय भावो द्योतते मनसि मे।

निश्चप्रचं दयातत्त्वकुण्ठीकृतमनोजवः।
अद्य धर्मप्रभुर्भूत्वा वेतास्मि करुणापथि॥ २२

भवतु महेन्द्रमाहूय गृहीतार्थं करिष्यामि। कः कोऽत्र भोः।

(प्रविश्य दौवारिकः)

दौवारिकः - आदिशतु भर्ता।

राजाः - भद्रसेन। सदाज्ञया अविदितराजकार्यः सुकुमारः महेन्द्रः इहानीयताम्।

दौवारिकः यदादिशति प्रभुः।

(इति निष्क्रान्तः, महेन्द्रेण सह प्रविशति)

महेन्द्रः - नमोऽस्तु प्रभवे अवन्ध्यकोपवशीकृतराजमण्डलाय।

अशोकः - (दीर्घं निश्वस्य)

पुनः पुनः क्लेशमवाप्नुवानाः कान्ता दशां भर्तृवियोगजाताम्।
निन्दन्ति कालं हिमवार्जनेत्राः लुठन्ति बन्धूननवेक्षमाणाः॥ २३

अपिच,

महेन्द्रः - नवोदितं क्लेशमसह्यमाप्ताः अशोचिषु श्शोकनदीनिमग्नाः।
विधौ गतेऽहो प्रतिकूलभावं नार्युत्पलैस्साम्यमधार्षिषुस्ताः॥ २४

राजाः - (सशोकं शिरोहस्ताभ्यां बध्वा, युद्धदिने सन्ध्यां स्मरन् ।

रक्ताणि नेत्राणि नितम्बिनीनाम् अंशुर्वसत्कोकनदानि नूनम् ।
सङ्कोचय स्तानिसहस्रभानुः अपाक्रमद्धन्त दयाविहीनः ॥

(नेपथ्ये कोलाहलः)

राजाः - दौवारिक ! गच्छ, विजानीहि कोलाहलस्य हेतुम् ।

दौवारिकः - यदाज्ञापयति देवः । (निष्क्रान्तः पुनः प्रविश्य)

दौवारिकः - राजन्, काश्चित्तरुण्यः भर्तृमृतिमसहमानाः अग्निं प्रवेष्टु मीहन्ते ।

राजाः - दौवारिक ! ताः सर्वथा निवार्यास्मादसद्यत्नात् इहानय ।

दौवारिकः - यदाज्ञापयति देवः (इति निष्क्रान्तः ताभिस्सह पुनः प्रविशति)

दौवारिकः - भवत्यः । इतः आगम्यताम् । (इति राज्ञः समीपं निर्दिशति)

तरुण्यः - स्वस्ति आयुष्मते महाराजाय भवते ।

राजा - हे सोदर्यः ! युद्धोन्मादिना मयैवायं निर्मितश्शोकः । तत् क्षम्यता मयं जनः । त्यजिषीध्वम् वह्नि प्रवेशम् ।

तरुण्यः - भो! नृपवर अत्र नते दोषः । विधिरेवात्र बलवान् ।पश्य -

बद्धाः स्मः कर्मणा पूर्वजन्मना चरितेन वै ।
भजस्व शोकं मा राजन् स्थीयतां वर्त्मनि स्थिरे ॥ २५

अशोकः - त्यजामि युद्धासक्तिम् । अद्य प्रभृति हिंसा प्रवृत्ति मपहाय मानवतोष कृत्सु कर्मसु गन्तास्मि पञ्चभूतेषु साक्षिषु ।

स्त्रियः - पुनः पुनर्भण महाराज । श्रवणाभ्यां पास्यामि । ईदृशैरेव कर्मभिः महाराजः सकलप्रजा मनः पङ्कजानां सहस्रांशुस्सञ्जायताम् ।

महेन्द्रः - राजन् कस्तेऽभिप्रायः ?

अशोकः - पुत्र! तप्तस्य मम तु एवं प्रतिभाति। तथा हि—

सर्वप्रजाहृदयरञ्जनसत्क्रियाभ्यः
त्याज्यं धनादिसकल ह्यसुभिस्सहैव।
कारुण्यमेव मनुते महदन्तरङ्गं
तत्याज राज्यमपि शाक्यमुनिर्यदर्थम्॥ २६

श्रुत्वा पुरातनमहर्षि मनोज्ञगाथाः
तेभ्योऽपिलिप्सति मनः यश एतदाप्तुम्।
स्वेदप्रसारपुलकौ वपुरश्नुवानौ
शान्ती रुणद्धि मनसः सकलाः प्रवृत्तीः॥ २७

अपिच,

विधिः कारयिंतु कर्म सङ्कल्पान् कल्पते हृदि।
समर्थ्यं श्च तान् बुध्या कृतपापांश्च नश्यति॥ २८

भवतीभिर्गम्यतां पुनः। स पुनरेवे प्रवर्तयिष्ये।

तरुण्यः - जय जय महाराज। सकलानन्दी भूयास्त्वम्।

(इति निष्क्रान्ताः)

(ततः प्रविशति दौवारिकः)

दौवारिकः - राजन्! भवत्प्रणिधिः महासेनः द्वारिस्थितः त्वां द्रष्टु मीहते। श्रुत्वा देवः प्रमाणम्।

राजा : अयस्व त्वम्। सत्वरं प्रवेशय।

दौवारिकः - यदेव आज्ञापयति। (इति निष्क्रान्तः। पुनः प्रविशति सप्रणिधिः)

महासेनः - वर्धतां भवान्। एधतां यशः।

राजाः - आयाहि महासेन। कः वार्तालापः?

महासेनः - राजन्निशामय। एवं हि भद्रबाहुगूढपालयो राज्ञोः प्रवृत्तिः।

राजा भूविं जिगीषू रणविजययशश्श्रीर्हि योद्धारणे नौ
एवं तौ मन्यमानौ स्वयुवति शिशु सन्त्यक्तबान्बव्यतस्तौ ।
पत्न्यौ राज्ञोर्नितान्वं रसरहितहृदौ स्पन्दमाने ह्यभूतां
चण्डाशौद्यन्धकारं क्षिपति तरुहृदि क्रोशमाने नळिन्यौ ॥ २९

राजा :- महासेन गच्छ । अद्य प्रभृति कारुण्ययुक्तमेव राजानं द्रक्ष्यथ. इति भण ।

महासेनः - यद्देव आज्ञापयति । (इति निष्क्रान्तः)

राजाः – दौवारिक ! सङ्घमित्रामानय ।

दौवारिकः - तथा (इति निष्क्रम्य तया सह प्रविशति)

राजा - महेन्द्र ! सङ्घमित्रे ! अद्य प्रभृति युद्धान् विहाय यात्रा कर्तव्या ।

सङ्घमित्रा - श्रुतं महाराज । महान् परिणामस्संवृत्तः त्वयि—

पूर्वमज्ञ'न सम्मिश्रः युद्धं त्वमगमो बली ।
यथाऽविद्यायुतो जीवः संसार मधिगच्छति ॥ ३०

महेन्द्रः - भगवान् संशुद्धहृदयः अहिंसातत्त्वमारवित् ।
पातासि हृन्दि च सतां यशो भूमिं महच्छ्रियम ॥ ३१

राजा अलमनया स्तुत्या । युवां धर्मप्रचाराय नानादेशेषु यतेथाम् ।

उभौ - तथा । (इति निष्क्रान्तौ)
(ततो राजा सौधाग्रे स्थित्वा)

राजा :- अहो अस्तमुपगच्छति भगवानंशुमाली रक्तः । तथाहि—
विधिविरचितयोगाद्दीपयत्पद्मिनीनाम्
कुमुदहृदयतोषं कल्पयद्दुःखजालम् ।

ककुभि निबिडमन्धं पातयद्रक्तभानुः
दशशतकिरणानां धामचास्तं यियासु ॥ ३२

अपिच,

पाण्डिम्नासुन्दरीणां कमलहृदिमुदा वारकान्ताश्रमेण
चौर्ये पाण्डित्यभाजां सुनियमित शुचा विस्स्वनैः कौशिकानाम् ।
सन्तोषैर्वातभाजां नृपभवनसभाराजकार्यक्रमैस्तैः
सार्थं लोकस्य साक्षी लयमनुसृतवान् चर्यया पण्डितानाम् ॥ ३३

पद्मिनि प्रेमभाजापि भानुना धर्ममूर्तिना ।
अदीयत बलात्पीडा पद्मिनीनां विधेर्बलात् ॥

हन्त सूर्य विम्ब मतिमनोज्ञम् । तथाहि—
वाराङ्गनानां मुखसुन्दरत्व सर्वस्व सन्दर्शन दर्पणं तत् ।
ज्योतिर्जगामाभिमुखं पयोधेः शोकोद्यकल्पीह पतत्त्रिचित्ते ॥

अपिच,

कटुविधिरथचक्रे चण्डभानौ गतेऽद्रिम्
गतपतिविरहाणां क्रन्दनान्युच्छतारम् ।
ध्वनिभिरिह समं हा पक्षिणां चोद्भवन्ति
श्रवणपुटविभेदक्लेशहीनानि तानि ॥

(ततो राजा सौधात् युद्धरङ्गमवलोक्य दूयमानचेताः भवति)

राजाः - अहा ! वृद्धमाता काचित्करदीपिका किरण सन्दृष्टा चिरकाल प्राप्त यौवनम् , दरहासनिवर्तित जननीश्रमम् , सन्ध्याकालारुणिमानमकाले निर्मितारं मुखरुधिरधाराभिः सुतमवलोक्य क्रिन्दते । कीटकावृत मांसवसा दुर्गन्धपूरितं तनयं वीक्ष्य शोचते । अहो कर्मणां प्रभावः (इति रोदिति) अजीवतं सज्जनान् । अशुचम् । खेदिष्यामि वा ? भवतु

कारुण्यसंवर्धनाय मांसाहार विहारयात्र यौठापि। कः कोऽत्र भोः?

(प्रविश्य दौवारिकः)

दौवारिकः - अयं, अहमस्मि।

राजा - भद्राक्ष! शुद्धान्तेषु शुद्धान्तःकरणैर्भाव्यम्। अतो मांसाहारं यात्रां त्यजेतिति ब्रूहि। अहमप्युपगुप्ताद्दीक्षां गृह्णामि।

दौवारिकः - तथा (इति निष्क्रम्य पुनरागत्य)

दौवारिकः - राजन् निवेदितमन्तःपुरेषु। उपगुप्ताचार्यान्तेवासी रम्यगुप्तः त्वां द्रष्टुमर्हते। श्रुत्वा देवः प्रमाणम्।

राजा : भद्राक्ष! स सत्वरं सत्कृतः समानीयताम्।

दौवारिकः यद्देव आज्ञापयति। (इति निष्क्रान्तः, रम्यगुप्तेन सह प्रविशति)

राजाः - स्वागतम्। इदमासनमलङ्क्रियताम्।

रम्यगुप्तः - विजयस्व राजन्। (इति सम्भ्रान्तोऽवतिष्ठते)

राजाः - विदितकर्तव्यार्थं निर्दिशन्तु भवन्तः।

रम्यगुप्तः - मामकीनं दवसित मुषर्बुदेनाक्रान्तम्। मत्सुतस्तस्मिन् नियन्त्रितधीः तद्रक्ष।

राजाः - मा बिभेतु भवान्। अयमहमागमिष्यामि।

(इति सर्वे गृहानुपसर्पन्ति)

राजाः - अहो भगवान् ज्वलनस्समाश्लेढीदं वेश्म। तदहं प्रविशामि (इति प्रविश्य, दग्धाङ्गुलीकः सपुत्रः समागच्छति)

रम्यगुप्तः - चिरमेधस्व राजन्। अद्य मत्सुतप्राणदानेन शोभसे।

राजाः - भवदनुग्रहो यदि परं शोभिष्ये।

रम्यगुप्तः - अहो, आश्चर्यमेतत्।

अग्निज्वाला क्रमण वशतः स्कन्धदेशेऽतिच्छिन्नम्
निक्षिप्यायं विलसति सतां रक्षणे बद्धदृष्टिः ।
धूमारक्तं नयनयुगळं मीलयन् सार्वभौमः
पीडोत्कर्षात् स्खलित गमनो निश्चलां वृत्तिमी‍ऽटे ॥ ३७

राजा: - रम्यगुप्त। गृह्यतामयन्ते कुमारः ।

रम्यगुप्तः - राजन् स्वस्त्यस्तु ते । (इति पुत्रमालिङ्गति)

(ततः प्रविशति भटः)

भटः - राजन् । उपगुप्ताचार्यो द्वारि ते दीक्षां दित्सुरास्ते ।

राजा: - तेन हि तूर्णं समानय ।

भटः - तथा । (इति निष्क्रम्य उपगुप्तेन सह प्रविशति)

राजा: - नमोऽस्तूपगुप्ताचार्याय गुरवे । भवदनुग्रहाद् देव जानाम्यहिंसायाः महिमानम् ।

उपगुप्तः - राजन् ! ते मानसीं दृढतां परीक्षितुकामैर्देवैरेषा घटना सङ्घटिता न वास्तविकी । तथाहि श्रूयताम्—

यक्षोऽयं रम्यगुप्तः त्वदमल हृदयोद्भास्यहिं सादिदृक्षुः
देवीः प्राकल्पिकरूपः विद्वळितविरयो राजसे राजचन्द्र ।
पुत्रो वह्नौन दग्धः निगमगमितधीः लब्धकीर्तिर्भवेस्त्वम्
यक्षं त्वं पश्यमित्रं स्मितवदनममुं ध्यातभूतेशमित्रम् ॥ ३८

(ततो यक्षः राजानं स्वस्थं करोति)

(नेपथ्ये कोलाहलः) (तदनन्तरं प्रविशति भटः)

भटः - राजन्! पौरास्सर्वेऽपि, धर्मप्रचाराय धर्माध्यक्षनियमनम्, धर्मसूत्राणां तीक्ष्णीकरण विलास, इत्यादीनि कर्माणि भवता विहितानि निरीक्ष्य देवं बहुमन्यन्ते ।

उपगुप्तः - विजयस्व राजन् ।

राजा - आचार्याः भवदनुग्रहं सद्यः फलं मन्ये । धर्मसूक्ष्मतानिरूपणेन दीक्षया च मां पुनन्तु भवन्तः ।

उपगुप्तः - तथैव । धर्म विद्यायाः सत्पात्रे भवानेन । पात्रे दत्ता विद्यैवतीव शोभते । पात्रापात्रविभेदस्तु महान् । पश्य ।

पतन्ति पुष्पाणि नितम्बिनीषु भूमौ विलुण्ठन्ति रजोयुतानि ।
तथापि तेषां कथमस्ति साम्यं श्रीकण्ठमूर्धस्थितसून जालैः ॥

अपिच,

देया विद्या पात्रतामाकलय्य
स्वाचार्येण प्रेमभाजाऽतिहृद्या॥

राजा - अन्तेवासी विद्यया भ्राजमानः ध्यायं ध्यायं सद्गुरुं यातु सौख्यम् ॥
(उपगुप्तो दीक्षान्ददाति)

उपगुप्तः - अद्य प्रभृति भारतदेश पालयितृषु गुण्यः अग्रगण्यश्च स्याः ।

यक्षः - राजन्! वृन्दारकचेतोऽरविन्दविकसनात्, देवपक्षेऽहं 'देवानांप्रियः' इति बिरुदेन त्वां परिष्करोमि । बिरुदमिदं देवानन्दकर्तृत्वं सूचयत् त्वय्येव रूढं स्यादन्यत्र प्रयुज्यमानं त्वपार्थं प्रयच्छतु ।
(ततः प्रविशति भटः)

भटः - देव! मन्वानाः त्वामेव पितरं सर्वाः प्रजाः 'प्रियदर्शी' इति बिरुदेन त्वामाह्वयन्त्यः समुत्सुकास्सन्ति ।

उपगुप्तः - राजन्' एष श्रेयसां पन्थाः । अद्य भवान् अशोकस्सञ्जातः । एतत्पुनः जन्म । स्याद्देवजन् । किन्ते भूयः प्रियमुपकरोमि ?

राजाः - भगवन् ! किमपरमस्त्यभिलषणीयम् । सर्वमेव मया लब्धम् । तथाहि—

याऽशान्तिर्हृदये बभौ मम गुरो ! निर्मूलिता सात्वया
कर्तव्यार्थमुपादिशन्ति भवतश्शिष्याः प्रजानां कृते ।
मद्राज्ये निरुपद्रवाः करुणया वर्याः स्थिताः धर्मिणः
तस्मा द्वाञ्छितु मस्ति किं ? विलसिताः कारुण्यभावाः हृदि ॥ ४१

तथापि यदि भवतां मुन्न, तदिदमस्तु । भरतवाक्यम्—

सन्तस्सद्गुण एव राजि सुमतौ रक्ताः नये भूमिपाः
शान्त्यां वेदविदो जले जलधराः प्रौढिम्नि सत्पण्डिताः ।
कारुण्ये सकलाः वसन्तु वितरां फालाक्षबद्धादराः
दुष्टाः बुद्ध निरूपितेन वचसाऽहिंसाप्रवृत्त्या युताः ॥

(इति सर्वे निष्क्रान्ताः)



हनुमद्दण्डकम्

जयजयजय सीताहृदन्तस्स्थ शोकाग्नि निर्वापकाम्भोज मित्रात्समाधीत सौशब्दवाचा समाकृष्टमोमोद्यमानौर्मिलेशाग्रज ! श्रीसहस्रांशुना त्वं महाव्योम मार्गे चरन् लब्धवान्शाब्दिकत्वं नचैकेवलं किन्तु सूर्यात्मजां आत्समानाञ्च पाणौ गृहीत्वापि निष्ठागरिष्ठस्त्वमासीरहो ते नियन्तृत्वमिन्द्रादिभि स्स्वर्गिभिर्मौनिभि श्चाप्यलभ्यं सदाराम पादाम्बुजद्वन्द्व संसेवनास्वाद तुष्टान्तरात्मा विभासि प्रभो त्वं द्युसच्छिष्टवायुं समाश्रित्य देव्यञ्जनायां जनिं लेभिषे रुद्रतेजोऽश जन्मा शिशुः क्षीरवाञ्छां विहाय, प्रभाद्योतिताशान्तराले हितेजश्च यस्याभवद्दुर्विषह्यं स्वयं जायया सञ्ज्ञया, त्वष्टृसंलालितासीत् ततस्साहि, यं भक्षितुं सैंहिकेयोऽपि सन्धेग्ध्यपाम्पित्ति कुध्रा महामण्डले यस्य भान्तीति वैज्ञानिका मुक्तकण्ठं समाहुर्म हात्मन् प्रगे सायमद्यापि मन्देहरक्षांसि यं क्लेशयन्ति प्रभो, यस्सहस्राणि द्वाविंशतिर्योजनानि क्रमन् भाति चाल्पेऽप्यनेहस्यहा तं सपस्तद्युचार्यंश्च हन्त पश्यत्सुदेवेषु हि त्वं समन्वादिथप्राग्यशस्ते समानक्षलोकेषु विश्वान्तरात्मन् समस्तं जगत्त्वं समादक्षिथ प्रेमराशे जगत्प्राणसूनुं विचक्षे विभो द्वापरे ज्ञानमार्गेण नूनं समूनौति चोन्नीत्यविद्यासुतं मामपि प्राणबन्धोऽव शास्त्रादिदुर्वासनास्त्वं बधनाशु लङ्कां यथात्वं ददग्धाद्यशारीरकभ्रान्ति मेनां हि कुर्या स्तथा देहदार्ढ्य विधस्वप्रभो अष्टधर्मान् जनान् पाहि च त्वं हनूमान् हनुर्ज्ञानवाची हि विद्यां श्रियं प्राप्तवान् पैतृकेभे मधौ शुक्लपक्षे मुरारेर्दिने लब्धजन्मासि केचिन्मधौ पूर्णिमायां दशम्यां स्थिरे वासरे ते जनुः प्राहुरार्याः पदं चाञ्जुमुच्चारयन् सेव्य इत्याह अम्बो वयं चाञ्जनीसूनवे विद्महे वायुपुत्राय सन्धीमहि ह्यर्कमूलेन सम्पूजितुर्भाग्यमस्तीति विद्वांस आहु रुष्ट्रश्च ते वाहनं पञ्चवक्त्रैर्विभासि नृसिंहः खगेशः वराहो हयग्रीवशाखामृगेशौ भवादेव भोगस्यमोक्षस्य दित्सावरीवर्त्य लक्ष्मीर्महाब्धि जयाद्येव सिन्दूरलिप्ताङ्गकश्चाङ्गुलीतालदानस्समासीर्हि तोष्टूय्य मानो विनालड्डुकैर्नो दयालुः कपे कालिकारूपमास्थाय यश्चावरामं शनिं शीर्ष मासाद्य छिन्त मेतां शिलां प्राप्य यश्छेत्तुमैच्छच्छिरः स्वं तया यो तुल-

Due date of Return | Due date of Return | Due date of Return

साख्यया राजमानाय राम स्वयं दर्शयामासिथ त्वं हि रक्तोसि रक्तत्वभाजां घनाकाङ्क्षिणां पीतवर्णो भवान् गन्धपूर्वे महापर्वते मादने भासि । वाराभिषेकेण जातोऽर्णवस्तत्र बालाभिधः पद्मिवर्णोसि च श्वेतपुण्ड्रश्च विद्योतसे कुम्भराशौ हिमांशौ कुळीरे विलग्ने भगोडौ हि कौण्डिन्यवंशे मुगायक्षरादिर्महान्यास उक्तो मनोर्यस्य गर्गाज्जयो लब्धमन्त्रो दयामाप्य यः फल्गुनो द्वापरे लब्धजन्मा ध्वजे त्वां समारोप्य सर्वं ददाहारितूलं शिवस्त्वां समाधौ विजज्ञे शुभो भद्रकादिर्महा भक्त वर्गस्तुतोष प्रसन्नादिमुद्राश्चतुर्थोत्तरन्यास राड्वहि ग्रग्घत्यतापसींत्सपायाद्ध-नूमान् कृपावृष्टि धाराम्प्रवृष्यात् महात्मन् श्रियं शेमुषीं ज्ञानवैराग्यभावान् प्रदत्स्व प्रभो रामनामेन हृष्टात्म जीविन् चिरं भाहि मच्छेतसि श्री हनुमन् नमस्ते नमस्ते नमस्ते नमः ॥

समाप्तः

SANSKRIT VIDYAPEETH
Accession No. 21413
DATE 29.10.03
GURUVAYOOR

BOOKS BY THE SAME AUTHOR ;

1) Navagrahastuthi — Rs. 6/-
   (with Skt. & Tel. Commentary)
2) Meeru Sanskritam Nerchukondi — Rs. 5/-
   (A Sanskrit reader through Telugu)
3) Ratnakavi Sahityanuseelanam — Rs. 30/-
   (A critical work on Ratnakavi in Telugu)
4) Rasanandam (Sanskrit Poetry) — Rs. 5/-

For Copies :

N. Phanikumar,
S/o N. Subrahmanyam,
S.B.S. Sanskrit College,
PONNUR – 522 124
Guntur Dt. (A. P.)